
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1963 विषय न्यायशास्त्र
नाव. जागदीशी व्यधिकरण
लेखक/लिपीकार ?
पृष्ठ 47 काळ ? पूर्ण/अपूर्ण

M-1963

जागदीशीव्यधिकरणधर्मावच्छिन्नाभावप्रारंभः॥

श्रीरामचंद्राय नमः॥ ॐ॥ श्रीगुरुभ्यो नमः॥ ॥समारब्धेति॥ समारब्धं यदनुमानप्रामाण्यपरी
क्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः॥
तथा च प्रामाण्यव्यवस्थापनोपोद्घाततसंगत्या व्याप्तिस्वरूपनिरूपणमिति भावः॥ अव्याप्यवृत्ती
ति॥ कथं संयोगी एतद्वृक्षत्वादित्यादावित्यर्थः॥ इदं च येन रूपेण येन संबंधेन साध्यत्वं तदवच्छिन्नप्र
तियोगिताकसाध्याभावप्रवेशमादाय॥ अन्यथाव्याप्यवृत्तिसाध्यकस्थलेपि विशिष्टाभावादिक
मादाय दोषो बोध्यः॥ अव्याप्यवृत्तिसाध्यकेपि गगनादिहेतावव्याप्त्यभावादाह॥ सद्धेताविति
वृत्तिमद्धेताविनितदर्थः॥ ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववसद्वैय
र्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात्॥ न चावृत्तित्वेन समं साध्यवद्भिन्नस्य अन्वयाविवक्ष
णात् साध्याभाववतास्समंतादात्म्येन तस्यान्वयविवक्षणान्नवैयर्थ्यमिति वाच्यं॥ तथापि साध्य
वद्भिन्नात्मकोमतुवर्थसंबंधीतद्वृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदव्यर्थताध्रौव्यादतः सप्तमी

तत्पुरुषसमर्थ्यं व्याचष्टे॥ साध्यवद्भिन्नेति॥ साध्यवद्भिन्नस्यावृत्तावतन्वयाद्यथा संभिवेशेन वैय
र्थ्यं॥ साध्याभावे साध्यवद्भिन्नवृत्तित्वविवक्षणं तु अव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः॥ सा
ध्यवद्भिन्नवृत्तित्वद्रव्यत्वाद्धिमति धूमादेः सत्वाद्व्याप्तिरसंभवो वास्यादतः साध्याभावेति॥ न च क
पी संयोगी एतद्वृक्षत्वादित्यादेः संग्रहार्थमधिकरणभेदेनाभावभेदमादाय लक्षणमिदं कार्यं॥
तथा च साध्यवद्भिन्नवृत्तिर्यो अभाववत्तद्वृत्तित्वमित्यस्यैव संम्यक्त्वे साध्यपदं व्यर्थमिति वाच्यं॥
प्रतियोगितासंबंधेन साध्यीयत्वेनैव साध्याभावस्य प्रवेशो न तु भावत्वेनापीति तद्व्यर्थत्वशंकान
वकाशात् वस्तुतः स्वप्रतियोगिभावच्छेदकसंबंधेन साध्यवद्भिन्ने वर्तते यः साध्यतावच्छेदकसंबंधा
वच्छिन्नसंसर्गेण साध्यीयो ऽभाववत्तद्वृत्तित्वमर्थः॥ तथा च साध्यतावच्छेदकसंबंधावच्छिन्नप्र
तियोगितासंबधेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवा
यादिसंबंधेन वह्न्यादिमतोन्यस्मिन् पर्वतादौ वर्ततेयः समवायाद्यवच्छिन्नवह्न्याद्यभावः तद्

तिधूमादेः सत्वादव्याप्तिः स्यादतस्तदुपात्तमितिनव्याः॥ केचित्तु॥ व्याप्यवृत्तित्वाव्याप्यवृत्तित्ववि
रुद्धधर्माध्यासात्संयोगाद्यभावस्यैवद्रव्यगुणाधिकरणभेदेनभेदो नतुगगनाद्यभावस्यमाना
भावात्॥ तथाचसाध्यवद्भिन्नवृत्तिगगनाद्यभाववतिधूमादेः सत्वादव्याप्तिरतः साध्यपदमित्या
हुः॥ तन्मंदं॥ गुणेगगनाभावेगुणत्वसामानाधिकरण्यंनतुद्रव्येगगनाद्यभावेतथात्वमित्या
दिप्रतीत्यागगनाभावस्यापिगुणत्वादिसामानाधिकरण्यतदभावयोर्विरुद्धधर्मयोः संभ
वादितिदिक्॥ नचघटत्वघटाकाशसंयोगान्यतराभाववान्गगनत्वादित्यत्राव्याप्तिः॥ साध्य
वद्भिन्नेघटेवर्तमानस्यगगनसंयोगात्मकसाध्याभावस्याधिकरणेगगनत्वहेतोसत्वादिति
वाच्यं॥ अभावाभावस्यातिरिक्ततामतएवैतल्लक्षणकरणादितिभावः॥ भिन्नत्वेति॥ द्रव्यनिष्ठ
संयोगाभाववतोभिन्नत्वइत्यर्थः॥ मानाभावादिति॥ तथाचात्राव्याप्यवृत्तिसाध्यकसद्धेताव
व्याप्तिरितिभावः॥ हेतोरिति॥ नचसाध्यवत्प्रतियोगिकान्योन्याभावस्यकेवलान्वयित्वादस

२

भवएववचनमुचितोनाव्याप्तिरितिवाच्यंवन्हिपानागनादित्यत्रावृत्तिगगनादिहेतौलक्षणासं
भवात् तस्यापिसद्धेतुतायास्स्वयमेववक्ष्यमाणत्वात्इतिभावः साध्यपदस्यसिद्धिकर्मतत्व्यक्ति
परतयातत्तद्व्यक्तिमत्वावच्छिन्नान्योन्याभावासामानाधिकरण्यरूपस्यपर्यवसितार्थस्यद्रव्यं
पृथिवीत्वादित्यादावेवलक्षणसमन्वयसंभवेगंधवतीपृथिवीत्वादित्यादावव्याप्तिरित्यपिवदंति॥
ननुसकलस्यसाध्यप्रतियोगिताकाभावस्याधिकरणाप्रसिध्याव्यभिचारिण्यतिव्याप्तिना
रणापपदिसाध्याभावस्यविशेषणंसाकल्यंतदावन्हिमाधूमादित्यादौसद्धेतावव्याप्तिःत
त्रापितत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्यतत्तत्सपक्षावृत्तित्वावच्छिन्नाभावस्यचसाध्यप्र
तियोगिताकाभावत्वेनास्याधिकरणाप्रसिद्धेरतआह॥ साकल्यंसाध्याभाववतीति॥ त
थाचसाकल्यंसाध्याभावेनविशेषणमतोनाप्रसिद्धिरितिभावः॥ नन्वेवमपिसाध्याभाव
वन्निखिलान्तर्गतेमहानसादौवर्तमानस्याभावस्यप्रतियोगित्वंधूमादौनास्तीत्यव्याप्ति

ताद्दशस्यमत आह साध्येवेति॥ तथाच सपक्षो महानसादिर्न सकलसाध्यस्याभाववा॥ने
त्यदोषः॥ अवस्तुव्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववतीया वत्वविशेषणे दत्ते एवसा
ध्यपावत्वमव्याप्तिवारकतया सार्थकं भवत्यतः साकल्यं साध्याभाववति भागे योजयति साक
ल्यमित्यादिनेत्यवतारयंति॥ तन्मंदं॥ साध्याभाववति साकल्यानुक्तावपि अतिव्याप्तिवारकत
यैव साध्ये साकल्यस्य प्रथमतः सार्थक्यसंभवात्॥ अन्यथा गगनादिवृत्तिधर्मवान्द्रव्यत्वादित्या
दौ पटत्वादिलक्षण तत्तत्साध्य[illegible]स्य भाववत् गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादौ अतिप्रसं
ग इति ध्येयं॥ ननु साध्यवत्वापि द्वित्वावच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिताका
भावस्य सत्वादसंभवः॥ किंच सकलपदोत्तरनाम्ना सकलसाध्यप्रतियोगिताकाभाववतो अ
नुपस्थापनात्तेन समं सकलपदस्य कर्मसारपोप्यनुपपन्न इत्यत आह॥ साध्याभावो वेति॥
तथाच साध्याभाववत्येव साकल्यं देयं न तु साध्येपीति भावः॥ साध्याभाववति साकल्यप्रयो

जनमाह॥ तेनेति॥ विपक्षैकदेशः कश्चिद्विपक्षः॥ साध्यनिष्ठसाकल्यस्य साध्यसामान्याभाव
स्यवाविवक्षायाः फलमाह॥ नवेति॥ एकव्य॥क्ते साध्यके सकलसाध्याभावापि अग्रे अव्याप्ति
स्खास्यतीत्याशयेन नानेत्युक्तं॥ अव्याप्यवृत्तीति॥ कपीसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः॥
यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यव्या
प्यवृत्तिहेतावव्याप्तिः संभवति तथापि यथाश्रुतमूलस्य तत्तन्त्र्याव्याप्तिरित्याचेद पितुं व्याप्यवृ
त्तिहेतुकेः॥ व्यभिचारिणीति॥ एतत्वृक्षत्ववान्कपिसंयोगादित्यादावित्यर्थः॥ अभावद्वय इति॥
साध्याभावहेत्वतावेचेत्यर्थः॥ अत्र साध्याभावप्रतियोगिवैयधिकरण्यं साध्यताघटकसंबं
धेन प्रतियोगिनोपदनधिकरणवृत्तित्वं॥ तेन धूमाभाववतोप्ययःपिंडादेः कालिकसंबंधे
न धूमादिमत्वेपि नातिव्याप्तिः॥ हेत्वभावप्रतियोगिवैयधिकरण्यं तु प्रतियोगितावच्छेदकसंस
र्गेण प्रतियोग्यनधिकरणत्वघटितं ग्राह्यं॥ तेनायमात्मा ज्ञानादित्यादौ साध्याभाववतो घ

टादेः र्व्हिवयतयाहेत्वभावप्रतियोगिमत्वेपिनाव्याप्तिः॥ हेत्वभावोपीत्यपिनासाध्याभावसं
ग्रहः॥ तेनविशिष्टसत्तावान्ज्ञातेरित्यादौनातिव्याप्तिः॥ यद्यपिसाध्याभावोपीत्येवक्रमानु
रोधेनवक्तुमुचितमपितथाद्यादेर्वहेत्वभावस्यलभसंभवात्तथापितत्प्रतियोगित्वेवत्यग्रेतत्सं
ननिर्दिष्टहेत्वभावपरामर्शासंभवात्॥ हेत्वभावप्रतियोगित्वमित्यभिधानेचगौरवादित्यमभि
धानं॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीतिप्रतियोगिपदंप्रतियोगितावच्छेदकताघटक
संबंधेनावच्छेदकस्यवैशिष्ट्यलाभाय॥ तेनन्हदादौकालिकेनधूमत्वावच्छिन्नस्यकाष्ठादेः सं
योगेनसत्वेपिनाव्याप्तिः॥ तत्प्रतियोगित्वंहेत्वभावप्रतियोगित्वं॥ हेतुतावच्छेदकरूपेणेति॥ हेतु
तावच्छेदकसंबंधेनेत्यपिबोध्यं॥ तेनात्मभिन्नद्रव्यत्वादित्यादौसाध्याभाववत्त्वात्मनिवर्तमानस्य
प्रतियोगितावच्छेदकसंसर्गेणप्रतियोगिव्यधिकरणस्यकालिकसंबंधावच्छिन्नद्रव्याद्यभाव
स्यप्रतियोगित्वेपिद्रव्यत्वस्यनातिव्याप्तिः॥ नचहेतुतावच्छेदकसंबंधेनप्रतियोगिवैयधिकर

४

ण्योक्तावतिव्याप्तिवारणसंभवाद्धेतुतावच्छेदकसंबंधेनप्रतियोगित्वविवक्षाव्यर्थेतिवाच्यं॥ तथा
सतिनिर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमादायैवलक्षणसंभवेनिर्धूमत्वव्याप्य
त्वाद्युत्तरग्रंथेवक्ष्यमाणाव्याप्त्यलग्नतापत्तेरितिध्येयं॥ हेत्वभावेप्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिवैयधिकरण्यविवक्षणफलमाह॥ तेनद्रव्यत्वादाविति॥ अन्यथासाध्याभाववतिगुणादौवि
शिष्टसत्ताभावस्यसत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिरेवस्यादितिभावः॥ अत्रद्रव्यत्व
स्यसाध्यतापांसकलसाध्याप्रसिध्यात्व्याप्तेः उक्तविवक्षयाप्यप्रतिकारादादिपदं॥ तेनगुणत्वत्वा
दिसाध्यस्योपसंग्रहः॥ द्रव्येतरासमवेतमात्रवृत्तेरत्रद्रव्यतामितिध्येयं॥ हेतुतावच्छेदकावच्छिन्नप्रति
योगित्वविवक्षायाः फलमाह॥ नवेति॥ सत्वादाविति॥ द्रव्यत्वादौसाध्य इत्यनुवर्तते॥ यत्रैकव्यक्तिक
मिति॥ तथाचद्रव्यंपृथिवीत्वादित्यादावव्याप्तिः सकलसाध्याप्रसिद्धेरित्यर्थः॥ नन्वेतोप्यस्वरसात्सा
ध्यसामान्याभावस्यैवनिवेशः तत्वासाध्येसाकल्यंनदेयमेवेत्यतआह॥ विपक्षोवेति॥ एकव्यक्ति

कमित्यनुषज्यतइत्यर्थः॥तथाचपर्वतैकव्यक्तिरेवसाध्याभाववतीनत्वगगगनादिरितिधर्मवानुगगनान्य
तादित्यादावव्याप्तिः॥साध्याभाववतःसाकल्याप्रसिद्धेरित्यर्थः॥ननुसाध्यादिभेदेनव्याप्तेर्भेदाद्यत्रै
कव्यक्तिकएवविपक्षः तत्रत्यलक्षणेसाध्याभाववतिसाकल्यंविशेषणंनदेयंअशेषत्वरूपंवासाक
ल्यंदेयमतोदोषांतरमाह॥निर्धूमत्वव्याप्यइति॥निर्धूमत्वस्यसाध्यत्वेयत्रैकव्यक्तिकमित्यनेनैवग
तार्थत्वात्स्यादतोव्याप्यपर्यंतं निर्धूमत्वव्याप्यस्यस्नेहादेः स्नेहत्वादिनासाध्यत्वेवह्न्यभावस्यव्यभिचा
रितानतत्संग्रहोनदोषायेत्युक्तं तत्वेनसाध्यइति॥निर्धूमत्वव्याप्यत्वेवसाध्यइत्यर्थः॥प्रत्येकमिति॥
हेत्वभावस्यापिमहानसीयादित्वहेः साध्याभाववत्सकलांतर्गतपर्वताद्यवृत्तित्वादव्याप्तिरितिभावः॥नि
रुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकनिरुक्तप्रतियोगिवैयधिक
रण्यावच्छिन्नयद्धर्मावच्छिन्नाभाववत्वंतद्धर्मवत्वंव्याप्तिरित्युक्तौनेषदोषइतिध्येयसाध्यवत्प्रतियो
गिकान्यत्वस्यधूमादिमत्तिसत्वादव्याप्तिरतआह॥अत्रेति॥तथाच॥साध्यवत्पदेननिरुक्तलक्षण

५

योपस्थापितस्यसाध्यतावच्छेदकविशिष्टसाध्यवत्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेन्वि
त्वेतादात्म्येनान्वयात्साध्यवतिचसाध्यवत्वावच्छिन्नभेदासत्वान्नाव्याप्तिः॥गुरुधर्मस्यावच्छेदकत्वोप
गमाच्चाद्रव्यंपृथिवीत्वादित्यादौद्रव्यत्वत्वविशिष्टद्रव्यत्ववत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिध्याना
व्याप्तिः॥यद्धर्मविशिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेन्यत्वादौतद्धर्मावच्छिन्नप्र
तियोगिताकत्वप्रकारेणैवतादात्म्येनान्वयः॥नतुतद्धर्माश्रयप्रतियोगिकत्वेनेत्यत्रव्युत्पत्तौमानमा
ह॥नहीति॥तादृशव्युत्पत्त्यस्वीकारेनीलघटेघटप्रतियोगिताकभेदसत्वान्नीलोघटोघटान्यइत्यपि
व्यवहारःस्यादितिभावः॥अत्रचद्रव्यंघटान्यदित्यप्रयोगाद्यभिष्टप्रतियोगिताकत्वेनभेदोन्यादि
शब्देनबोध्यः॥तद्वृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वंततएवघटोघटान्यइत्यस्यवारणासंभवान्नी
लघटत्वस्यतद्धर्मितावच्छेदकत्वपर्यंतानुधावनमितिमंतव्यं॥भिन्नोघटोघटान्यइत्येवपाठःसम्यक्
तथैवप्रकृतोपयोगित्वसंगतेः घटादन्यइतिपाठस्तुसाध्यवदन्येत्यत्रपंचमीसमासेलुप्तविभक्ति

स्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमाहत्य कथंचित्संगमनी
यः॥ घटः पटो नेत्यादौ तु परपदं मुख्यार्थपरमेव न तु प्रकृते तद्वत्पटत्वावच्छिन्नप्रतियोगिताकपरं निपा
तातिरिक्तस्थले एव नामार्थयोः भेदान्वयस्याव्युत्पन्नतया नञ्पदोपस्थापिते भेदे पटत्वावच्छिन्नप्रति
योगिताकत्वसंसर्गेण पटस्यान्वयसंभवात्॥ पटत्वावच्छिन्नप्रतियोगिताकत्वं तु पटत्वमवच्छिन्नत्वं प्र
तियोगित्वं चेति त्रितयमेव विशेष्यविशेषणभावापन्नं संसर्गः॥ न तु वस्तुगत्या पटत्वावच्छिन्नं यत्प्रति
योगित्वं तन्मात्रं॥ पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवबलसिद्धत्वात्॥ अन्यथा तत्तत्प्रतियोगिता
व्यक्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात् प्रमाणाभावात्॥ अत एव
केवलान्वयिग्रंथे वह्निर्नास्तीत्यत्र वह्नित्वतदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति
स्वयमप्युक्तं॥ इत्थं च प्रमेयं नास्ति कंबुग्रीवादिमान्नास्तीति शाब्दबोधानां संसर्गकोटावेव प्रतियोगि
तायां प्रमेयत्वावच्छिन्नत्वावगाहितया भ्रमत्वं॥ संसर्गप्रकारकसाधारणविशेषणविशेष्यभाव

स्यैव भ्रमत्वादिघटकत्वात्॥ अन्यथा स्वरूपसंबंधेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगित्वस्याली
कतया भ्रमत्वं च तत्संबंधेन प्रमेयस्य धर्मिण्यन्वयासंभवेन भ्रमत्वानुपपत्तेः॥ सदुपरागेणाथ
सतः संसर्गमर्यादया भानस्यानंगीकारात्॥ क्लृप्तेन पटत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधेन चा
भावे प्रमेयस्य सत्त्वेन तादृशसंबंधेन भ्रमत्वस्यैव वक्तुमशक्यत्वात्॥ पटत्वादेरन्वयितानवच्छेदक
तया तदवच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रमेयत्वादिविशिष्टस्यान्वये निराकांक्षत्वाच्च॥ अन्य
था पटत्वस्यापि पटो नास्तीत्यादेः प्रमाणत्वापत्तेः तत्तत्पटत्वावच्छिन्नप्रतियोगिकत्वसंबंधेन
पटविशिष्टस्य पटविशेषाभावस्य तत्र सत्त्वात्॥ एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्ता
त्वावच्छिन्नस्य समवाये नास्तित्ववत् पटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन घटत्वाद्यवच्छिन्नव
तोऽपि घटाभावस्य न तादृशसंबंधेन प्रमेयत्वाद्यवच्छिन्नवत्त्वमतोऽप्रमेयं नास्तीत्यादौ पटत्वाव
च्छिन्नप्रतियोगिताकत्वसंबंधेन प्रमेयत्वाद्यवच्छिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तं॥

पटत्वादेरन्वयितानवच्छेदकतयातदवच्छिन्नप्रतियोगितासंबंधेनप्रमेयत्वविशिष्टस्यान्वये
निराकांक्षतयातथात्वान्वयस्यासंभवादितिध्येयं॥ नीलोघटोनास्तीत्यादौतुनीलघटत्वस्या
न्वयितावच्छेदकत्वेतादृशधर्मावच्छिन्नप्रतियोगित्वमेवसंसर्गोनतुनीलत्वादिप्रत्येकावच्छि
न्नप्रतियोगित्वंनीलपटस्यपीतघटस्यचाधिकरणेतादृशप्रयोगानापत्तेः॥ नीलोपलक्षि
तस्यघटत्वमात्रस्यान्वयितावच्छेदकत्वेतुघटत्वावच्छिन्नप्रतियोगित्वंतथा॥ संयोगेनघटोना
स्तीत्यादौतुतृतीयाविभक्तेरवच्छिन्नत्वमर्थः॥ संसर्गीभूतप्रतियोगितायांतदन्वयासं
भवात्॥ किंत्ववच्छिन्नप्रतियोगिताकत्वंप्रतियोगित्वमात्रंवा॥ अवच्छिन्नत्वसंसर्गेणसंयोगा
देस्तत्रान्वयादेवविशिष्टलाभसंभवात्॥ नचैवंसंयोगेनघटाभावस्यैवतत्समवायेनघटविशिष्ट
त्वाभाववत्तयासमवायेनकपालेघटोनास्तीतिव्यवहारापत्तिः॥ तृतीयांतसमभिव्याहारस्थ
लेतदुपस्थाप्यप्रतियोगित्वस्यैवसंसर्गतयाव्युत्पन्नत्वात्॥ समवायावच्छिन्नघटप्रतियो

६

गिताकाभावस्यकपालेविरहात्॥ अस्तुवाघटत्वावच्छिन्नत्वस्यैवसंयोगादिसंबंधावच्छिन्नत्वस्या
पिप्रतियोगित्वांशेसंसर्गमर्यादयैवभानं॥ तृतीयांतसमभिव्याहारस्यनियामकत्वाच्चनाति
प्रसंगः॥ घटानधिकरणंभूतलमित्यादौतुलक्षणयाऽधिकरणपदमेवघटाधिकरणार्थकंघ
टपदंतुतात्पर्यग्राहकं॥ अन्यथानधिकरणपदेनाधिकरणसामान्यभिन्नत्वोक्तौभूतलेतस्य
बाधःस्यात्॥ नचघटान्वितस्यैवाधिकरणस्यभेदस्तत्रनञाबोधनीयः॥ समासांतर्गतनञ
उत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः॥ अन्यथानीलाघटोघटइत्यादौनीलघटान्यस्यघटत्वं
नीलाप्रमेयःपटःइत्यादौचनीलप्रमेयान्यस्यपटत्वंप्रतीयेत॥ वस्तुतःससंबंधिकपदस्थले
व्युत्पत्तिवैचित्र्यात्प्रतियोगितानवच्छेदकंघटानधिकरणंभूतलमित्यादौघटान्वितस्यैवाधिकरणा
देर्भेदोभासतइत्यन्यत्रत्रिपदतत्पुरुषानुपगमेपिघटस्यनाधिकरणंप्रतियोगितायाःनावच्छे
दकमित्यादिःइत्यादित्रिपदतत्पुरुषेणविशिष्टलाभसंभवादितिपरमार्थः॥ पीतःशंखोनास्तीत्या

दौ शाब्दबोधस्तन्न शंखत्वावच्छिन्नतयाप्रतियोगित्वमवगाहते ॥ तन्मात्रस्यान्वयितानवच्छे
दकत्वात् ॥ शंखवत्तया निश्चिते धर्मिण्यपि तादृशप्रयोगात् ॥ परं तु पीतशंखत्वावच्छिन्नप्रतियो
गितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते न आदिपदानां पदस्य मविशिष्टवैशिष्ट्याव
गाहित्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियो
गितासंसर्गकान्वयबोधजनकत्वव्युत्पत्तेः ॥ इयांस्तु विशेषः यत् घटो नास्तीत्यादिशाब्दबोधे
सांसर्गिकीप्रतियोगितावगाहितामसिद्ध्येन घटत्वावच्छिन्नप्रतियोगितात्वेनैव निरूपिता
पीतः शंखो नास्तीत्यादौ पीतशंखत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनैवेत्यादिकं बहुतर
मूहनीयं ॥ राम ॥ साध्यासामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधि
करण्यमादि द्वितीयलक्षणे न पौनरुक्त्यापत्तिरतो व्याचष्टे ॥ साध्यमसमानाधिकरणं यस्ये
ति तत्त्वमिति परेणान्वयः ॥ वह्निमात्रस्यैव व्यधिकरणत्वात् धूमासमानाधिकरणत्वात् वह्नि ८

मान्धूमादित्यादावव्याप्तिराह ॥ यदधिकरणेति ॥ यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्याप
स्याधिकरणं साध्यानधिकरणमिति तत्त्वमित्यर्थः ॥ तत्तद्धूमाधिकरणं तु न वह्निसामान्यान
धिकरणमतो नाव्याप्तिरिति भावः ॥ ननु घटादिरूपयद्व्यक्त्यधिकरणं साध्याभावीभूत धूमानधि
करणं तद्व्यक्तित्वानधिकरणत्वं वन्ध्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः । यद्यद्व्यक्त्यधिक
रणं साध्यानधिकरणं तत्तत्त्वानधिकरणत्वोक्तौ तु महागौरवमतस्त्वाह साध्यनिष्ठेति ॥ साध्य
निष्ठाभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः सामानाधिकरण्याभावोक्तिः । न च साध्यनिष्ठस्य
सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्य एव न तु वन्ध्यादावित्यसद्धेतावति
व्याप्तिः साध्यनिष्ठाभावप्रतियोगिवृत्तिता निरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात् । वस्तु
तः असामानाधिकरण्यं सामानाधिकरण्यसंबंधेनाभावः सामानाधिकरण्याभाव इति पर
मार्थः । न चैवं द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः । सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्यः

सत्त्वादेतद्रसस्तैनैववाक्येनोत्तरमिति। नन्वेवमपि वह्निमान् धूमादित्यादिविषमव्याप्तहेता
वव्याप्तिर्वह्निनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपकपर्वता
दौ धूमादेर्वर्त्तमानत्वात्साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ
महागौरवमत आह साध्यनिष्ठाधेयत्वेति॥ अत्राधेयत्वं साध्यताघटकसंबंधेन ग्राह्यं। तेन रूप
वान् महाकालत्वादित्यादौ संबंधसामान्येन रूपनिष्ठाधेयतानिरूपके गगनादौ हेतावृत्तित्वे
पिनातिव्याप्तिः। तद्वृत्तौ। साध्यवद्भिन्नवृत्तौ। तथा च द्रव्यं सत्त्वादित्यादौ नातिव्याप्तिरिति भावः
ननु साध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुताघटकसंबंधेन वाच्यं। अन्यथा व
ह्निनिष्ठाधेयतानिरूपके स्वावयवे समवायादिना धूमादेः सत्त्वाद्व्याप्त्यापत्तेः। तथा च सत्तावा
न्द्रव्यत्वाद्धूमादित्यादावव्याप्तिः। साध्यनिष्ठाधेयतानिरूपके जात्यादौ समवायेन संयोगेन वा द्र
व्यप्रसिद्धेः। किं च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः। द्रव्यनिष्ठाधेयतानिरूपकगुणादिवृत्ति

५

त्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह साध्यनिष्ठेति। धूमनिष्ठाधेयतानिरूपके जलादौ वह्न्याध
धिकरणत्वाभावस्य सत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति। व्यापकेति। व्यापकत्वं तु प्रतियो
गिवैयधिकरण्याघटितमेवत्र ग्राह्यं। तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभा
वस्य तत्प्रायः पिंडवृत्तित्वेपिनातिव्याप्तिः। वह्न्यधिकरणत्वगगनोभयत्वावच्छिन्नाभावस्य धू
मनिष्ठाधेयतानिरूपकत्वव्यापकत्वादत उक्तं सामान्यपदं। तथा च हेतुताघटकसंबंधावच्छिन्नय
द्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयतानिरूपकाधिकरणत्वव्याप
कत्वं तद्धर्मवत्त्वमर्थस्तेन वह्न्यनधिकरणजलादेः कालिकसंबंधेन धूमाधिकरणतायाः सत्त्वेपि
नाव्याप्तिः। न वा वह्न्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमानधिकरणत्वव्यापकत्वेऽ
तिव्याप्तिः। न च हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणत्वव्यापक
त्वमित्यस्यैव सम्यक्त्वेऽधिकरणत्वाभावप्रवेशो व्यर्थ इति वाच्यं। वृत्तिनियामकसंबंधेन हेतुता

याभव्याप्तिप्रसंगात्तादृशसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धेः। अस्माकं तु तादृशसंबंधेन यद्वे
तुसंबंधितं तस्य स्वरूपसंबंधावच्छिन्नाभावमादाय लक्षणसंभवात्। किंच। अधिकरणताप्रवेशे वह्न्या
देः साध्यत्वे संयोगादिसंबंधेनापि रूपादिहेतावतिव्याप्तिः। संयोगेन रूपाद्यभावस्य केवलान्व
यितया वह्निनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति भावः। साध्यवद्भिन्नेति। अ
त्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वं निकर्षो ग्राह्यः। ते
न सत्तावान् द्रव्यत्वादित्यादौ नाव्याप्तिः। ननु प्रागुक्तस्यार्थस्य शब्दांतरेणाभिधानं अनुवादः।
स चात्रासंभवी साध्यं यदधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वा
नधिकरणत्वस्य प्रागुक्तस्य साध्यानधिकरणानधिकरणत्वशब्देनाबोधनादत आह
चरमेति। तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याप्रवेशाद् ऐक्यमर्थे न संभवतीत्यत उक्तमननि
प्रयोजनेति। तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे॥

१०

साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव तात्पर्यात् प्रागभिप्रेतार्थस्य शब्दांतरेणाभिधा
नमनुवादः स चात्र संभवत्येवेति भावः। साध्यमित्यादि। साध्यानधिकरणेत्यादिमध्यवर्तिन
उव्यत्यासेन चरमाधिकरणत्वांशेन सहान्वयादेवानुवादत्वलाभ इत्याशयः। केवलान्व
यीति। अव्याप्तिरिति परेणान्वयः। अव्याप्त्या हेतुमाह साध्यनिष्ठेति। नानाव्यक्तिकेति। मूलो
क्तं हेतुमभिप्रेत्य शब्दत्वानुगगनादित्यादौ नानाव्यक्तिकाव्याप्तिविरहेपि न क्षतिः। न्यूनतां परि
हरति क्वचिदिति। विशिष्टसत्तावान् ज्ञानेत्यादौ अतिव्याप्तिरित्यर्थः। विशिष्टधर्मावच्छिन्ना
धिकरणत्वस्यैव तदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः। यत्किंचिदिति। साध्यवद्व्यक्ति
भिन्नव्यक्तित्वावच्छिन्नभेद इत्यर्थः। नानाधिकरणकसाध्यकेति। यत्र साध्यतावच्छेदकावच्छि
न्नाधिकरणं नाना तत्रेत्यर्थः। तेन कस्यांचिदपि वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेपि
न वह्निसाध्यकधूमादिसंग्रहः। सर्वत्र केवलान्वयिनि तादृग्भिन्ने च। सार्वभौमस्य मतमुत्था

पयतिकेचिदिति। हेत्वधिकरणवृत्तिसप्तम्यर्थो। वच्छिन्नत्वंसाध्यवद्वृत्तित्वाभावेऽन्वितं। तेनै
वेति। हेतुतावच्छेदकसंबंधेनैवेत्यर्थः। तस्यचसाध्यवद्वृत्तित्वेनसहान्वयः। साध्यवत्वमपियेन
संबंधनयेनरूपेणसाध्यतातेनसंबंधेनतद्रूपावच्छिन्नत्वंबोध्यं। तेनसमवायेनवन्हेःसाध्य
त्वेधूमेविशिष्टसत्वसाध्यकेसत्वादौचनातिव्याप्तिः। तदधिकरणभिन्नत्वमिति। तदत्यंताभा
ववत्वोक्तौद्रव्यंसत्वादित्यादावतिव्याप्तिः गुणावच्छेद्यस्यद्रव्यवृत्तित्वाभावस्यैवद्रव्यावच्छेदेन
सत्तायामभावसत्वात्। तेऽभिन्नत्वपर्यंतानुसरणं। भेदस्तुनाव्याप्यवृत्तिस्तद्व्याप्यवृत्तित्वेतु
तादृशाभाववत्तियावर्त्तीव्यक्तिः। तावद्देरकुटवत्वंवक्तव्यमितिभावः। हेतुतावच्छेदकसंबंधे
नहेत्वधिकरणस्यफलमाहस्वावयवेसंयोगेनेति। अवृत्तावपिनक्षतिरित्यन्वयः। तथाच
तादृशसंबंधेनहेत्वधिकरणत्वाप्रवेशेस्वावयवावच्छेदेनधूमवान्हिमत्संयुक्तत्वाभाववत्वा
द्वन्हिमान्धूमादित्यादावव्याप्तिःस्यान्नपुनरसंभवः। इदंचाव्यंतेयत्वादित्यादावेवलक्षण ११

संभवादितिभावः। अत्रोत्पत्तिकालावच्छिन्नेघटेपृथिवीत्वेरूपवद्वृत्तित्वंतेत्यादिप्रतीत्यापृ
थिवीत्वादौरूपवद्वृत्तित्वाभावाभ्युपगमेहेत्वधिकरणनिष्ठमवच्छेदकत्वनिरवच्छिन्नंग्राह्यं। ते
नरूपवान्पृथिवीत्वादित्यादौनाव्याप्तिः। तत्रघटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदा
दितिध्येयं। तेनैवेत्यस्यफलमाहवन्हिमतिचसमवायेनेति। हेतुतावच्छेदकसंबंधेनसाध्यव
द्वृत्तित्वानुक्तौसंबंधसामान्येनहेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वसामान्याभावोनप्रवे
श्यः। साधनाधिकरणावच्छेद्यतादृशाभावाप्रसिद्धेः। किंतुयत्किंचित्संबंधेनसाध्यवद्वृत्तित्वा
भावप्रवेशनीयः। तथाचहेत्वधिकरणपर्वतावच्छेदेनधूमादौवन्हिमत्समवेतत्वाद्यभावसत्वाद
संभवएवस्यात्। यदितेनैवसंबंधेनसाध्यवद्वृत्तित्वप्रवेशोनस्यादितिभावः। ननुहेत्वधिकरणाव
च्छेद्यत्वविशिष्टस्यसाध्यवद्वृत्तित्वाभावस्याधिकरणाप्रसिद्ध्यालक्षणमिदमसंभवी। तदधि
करणस्यैवतन्निष्ठधर्मावच्छेदकतयागगनजलत्वादौवन्हिमत्पर्वतसंयुक्तत्वाभावस्यधूम

वत्पर्वतानवच्छेद्यतोक्तत्वाहतादृशाभावश्चेति। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाव
श्चेत्यर्थः। संबंधांतरेणाहेतुतावच्छेदकसंबंधान्यसंबंधेन। तथा च हेतुमत्पर्वतावच्छेद्यत्वविशिष्ट
स्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वे पर्वतीयरूपादावेवाप्रसिद्धमिति भावः। यद्यपि
रूपादौ वह्निमत्संयुक्तत्वाद्यभावस्य व्याप्यवृत्तित्वात्तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरे
कं वृत्यर्थमवच्छेदकभेदस्वीकारात्प्रसिद्धिस्तादवस्थ्यं। न च महानसादिसंयुक्ते कालिकादि
संबंधेन पर्वतनिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेद्यत्वप्रसिद्ध्या न दोष इति वा
च्यं। इष्यमपि एतद्रूपवानेतद्रसादित्यादौ एतद्रसाधिकरणावच्छेदेनैतद्रूपवत्समवेतत्वाभा
स्याप्रसिद्धेर्दुर्वारत्वात्। तथापि पर्वभावच्छेदेन तदीवरूपे न वह्निमत्संयुक्तत्वनित्यादिप्रतीत्या
व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्थमभिधानं॥ त्रा हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वा १२
भावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वं वा ग्रंथतात्पर्यं। तथा च व्याप्यवृत्तेर

वच्छेदकत्वासत्वेपि साध्यवद्वृत्तित्वाभावविशिष्टस्य तस्याधिकरणत्वमादायैव लक्षणसंगतिः। न च
वल्लगत्या यः साध्यवद्वृत्तित्वाभावविशिष्टस्तदधिकरणत्वं हेतुमतस्तदन्यत्वोक्तौ वह्निमान्धूमादि
त्यादावव्याप्तिः। त्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधन
वत्पर्वतादौ सत्वात्। साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वं हेतुमतस्तदन्यत्वो
क्तौ तु वह्निमान्धूमादिदे वाच्यं द्रोपत्वादित्यादौ सर्वत्रासंभवः। साध्यवदसंयुक्तत्वादिविशिष्टतद्रू
पादिव्यक्तित्वस्य गुरुतया न तदवच्छिन्नाधिकरणताप्रसिद्धिः। केवलस्यातिप्रसंग एव विशिष्टध
र्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिति वाच्यं। सार्वभौमानां मते प्रतियोगितादा
द्रवाधिकरणतायाः अपि गुरुधर्मावच्छेद्यत्वोपगमात्। अन्यथा समवेतत्वत्वादिकमपेक्ष्य सत्ता
वत्समवेतत्वत्वस्य गुरुतया साध्य~~सामानाधि~~ वद्वृत्तित्वत्वावच्छिन्नाभावप्रसिद्ध्या सत्तावान्द्रव्य
त्वादित्यादावव्याप्तिप्रसंगात्। ननु साध्यसामानाधिकरण्यवतो न तद्भाववत्वमतो द्रव्यं सत्वादि

त्यादौ व्यभिचारिण्यतिव्याप्तिप्रसंगादित्यत आह व्यभिचारिणस्त्विति। तादृशीति। हेतुताघटकसंबंधे
नहेतुमतीत्यर्थः। तादृशाभाववत्वं। साध्यवद्वृत्तित्वाभाववत्वं। अत्रैवानुभवं प्रमाणयति सत्तायामि
त्यादि। एवं सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे। विशिष्टसत्वइति॥ विशिष्टसत्वस्य बोध्य
हेतावित्यर्थः। यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्तायां सत्ताव्यक्तावव्याप्त्याशंकायां उत्तरग्रंथेनानि
रासादसंगत्यापत्तेः। अतिरिक्तत्वादिति। विशेषणविशेष्याभ्यां भिन्नत्वादित्यर्थः। तथा च गुणा
दिकं न हेत्वधिकरणमतो नाव्याप्तिः। उभयत्वमपि एकविशिष्टापरत्वमेव तच्चातिरिक्तमेव नातः
स्पर्शवान्भूतत्वमूर्तत्वोभयस्मादित्यादावव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधि
करणावच्छेदेनेत्युक्तावपि विशिष्टसत्वादिहेतौ नाव्याप्तिः। न च धूमाधिकरणमहानसावच्छेदेन पर्व
तीयधूमे वह्निमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्वादव्याप्तिः। महानसीयेतरपिकालिकादिसं
बंधेन पर्वतीयधूमाद्यधिकरणत्वात्तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यं। स्वा

१३

स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्वमिति फलितार्थस्य तत्तेत्धूमत्व
धर्ममादायैव लक्षणसंभवेन धूमत्वस्य हेतुतानवच्छेदकत्वेऽक्षत्यभावात्। तथापि विशिष्टस्यातिरि
क्तत्वात्तत एवाव्याप्तिवारणसंभवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवमसंभवो वावि
शिष्टनिरूपिताधिकरणत्वाप्रसिद्धेः। एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे तादृूपेण कथायां हेतो
रुपन्यासो न स्यादित्याशयः। ननु विशिष्टस्यातिरिक्तत्वे मानाभावः। न च गुणो विशिष्टसत्तावा
निति प्रतीत्यभाव एव मानं। गुणस्य विशिष्टसत्ताधिकरणत्वविरहात्तादृशप्रतीत्यसंभवात्। न
च विशिष्टसत्तानिरूपिताधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमप्यतिरिक्तमस्तु। विशिष्टाधिक
रणतायाः क्लृप्तद्रव्यत्वाधिकरणत्वस्वरूपत्वाभ्युपगमात्। किं च विशिष्टस्यातिरिक्तत्वेऽपि द्रव्यं वि
शिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्ववदिति प्रत्ययप्रसंगः। सत्ताभाववुद्धिप्रतिस
त्ता निश्चयस्यैव विरोधितया तद्रसत्वातोऽस्वातंत्र्येण विरोधित्वांतरकल्पने गौरवात्। एवं विशेष

णविशेष्योभयसामग्रीविगमेपि विशिष्टग्रहप्रसंगः। तदुभयग्राहकसामग्र्या विशिष्टग्रहहेतु
त्वकल्पनेपि गौरवांतरस्फुटमेवेत्यत आह। अनतिरेकेत्विति। गुरुवस्तु। विशिष्टस्यातिरिक्तत्वादि
ग्रंथस्य विशिष्टनिरूपकाधिकरणत्वस्यातिरिक्तत्वादितिभावः। तथा च हेतुतावच्छेदकविशिष्टहेत्वधि
करणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेशितमतो नाव्याप्तिरित्याशयः। ननु विशिष्टाधि
करणत्वं नातिरिक्तं विशिष्टसत्तावानितिप्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवो
पपत्तेः। अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्त्वप्रतीत्यापत्तेः। विशिष्टवत्ता
बुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबंधकतायाः स्वातंत्र्येण कल्पनादित्यरुच्येनेतदाप्या
हुः अनतिरेकेत्वितिप्राहुः। विशेषणेति। विशेषणं गुणकर्मान्यत्वं विशेष्यं सत्ता। अनयोः सामाना
धिकरण्यात्मकसंबंधस्येत्यर्थः साक्षात्संबंधेन तस्य व्यभिचारित्वात्। अत आह परंपरयेति। १४
अवच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः। सत्त्वगुणकर्मान्यत्वयोर्द्रव्य एव सामानाधिकरण्य

मितिप्रतीत्यावच्छेदकतासंबन्धेन तदुभयसामानाधिकरण्यस्य द्रव्य एव सत्त्वान्न व्यभिचार इति
भावः। नन्वेवं ज्ञेयत्वाधिकरणघटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य घटीयरूपादौ सत्त्वात् तादृशा
धिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतावपीत्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसंगतमित्यत
आह केवलान्वयीति। द्वितीयेति। तत्र साध्यवद्भिन्नत्वस्याप्रसिद्धत्वादिति भावः। यद्यपीदं वाच्यं
प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि हेतौ प्रथमलक्षणेऽव्याप्तिः संभवति प्रमेयावच्छे
देन वाच्यत्ववत्तादात्म्यविरहस्याप्रसिद्धेः। न च घटावच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वा
दौ सुलभः। तथा सति घटत्वं घटेन वाच्यमित्यपि प्रतीत्यापत्तेः। तथापि स्वाधिकरणनिरूपि
तहेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वाभावोऽत्र लक्षणघटक इत्यभिप्रायेण द्वितीयाभिधा
नं। स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणीभूतपटव्यक्तिनि
रूपिततादात्म्येन वाच्यत्ववत्संबन्धित्वाभावस्य पटावच्छेदेन पटत्वादावेव प्रसिद्धिः। वस्तुतस्तु

केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रं। न त्ववच्छेदकगर्भं तथा च तादृशात्यन्न न किंचिदपि
प्रमेयं केवलान्वयीति द्वितीयलक्षणे एवं तादृशकेवलान्वयिन्यव्याप्तिसंभवात् यथाश्रुतमेव सम्य
गिति ध्येयं। नव्यास्तु केवलान्वयिन्यव्याप्तेरिति केवलान्वयिनि सामान्ये अव्याप्तेरभिधाने द्विती
यलक्षणाभिप्रायेणेत्यर्थः। तेन प्रथमलक्षणेऽपि किंचित्केवलान्वयिनि तादृशात्यन्न प्रमेयादि
हेतावन्याभावयिन क्षतिरित्याहुः। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतेः। स
त्तानिष्ठसामानाधिकरण्यस्यावच्छेदकताभावं गुणेऽवगाहते इत्यत्र समानाकारप्रतीतिं दृष्टा
न्तयति द्रव्यत्वे गुणा इत्यादि। ननूक्तप्रतीतेर्न गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्या
भावो विषयः। गुणस्य द्रव्यत्वानधिकरणतया तन्निष्ठवृत्तित्वाभावावच्छेदकत्वासंभवात्। किं
तु द्रव्यत्वनिष्ठपृथिवीत्वसामानाधिकरण्यं तदवच्छेदकताभाव एव गुणे विषय इति तद्दृष्टा
न्तमपीति भावः। अवच्छेदकत्वाभावमिति प्रात्यक्षिकप्रत्ययाभिप्रायेणेदं। सत्तायां गुणे न द्र

व्यत्वसामानाधिकरण्यमित्यादिशाब्दस्थले ऽवच्छेदकत्वोपस्थापकपदान्तरविरहात्। तदभावस्य
गुणादौ बोधयितुमशक्यत्वात्। किंतु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणावच्छेद्यमित्या
कारक एव तत्र बोधः। गुणादावित्यत्र सप्तम्यर्थगुणावच्छेद्यत्वस्य नञर्थेऽन्वयादिति ध्येयं। न
न्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुध्येत। सामाना
धिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वस्याप्रसिद्ध्या तादृशावच्छेदकत्वाभावविषयक
प्रतीतेर्भ्रमत्वापत्तिश्चेत्यत आह परंपरासंबंधेनेति। निरूपकताख्यस्वरूपसंबन्धेनेत्यर्थः
न त्ववच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः। सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रत्य
यप्रसंगात्। सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्रापि तस्यावच्छेदकत्वसंबंधेनासत्वात्
न त्विति। तथा च द्रव्यं सत्तादित्यादावतिव्याप्तिरिति भावः। ननूक्तदृष्टान्तस्थले बाधकसत्त्वा
दवच्छेदकत्वाभावः प्रतीतेर्विषयोऽस्तु। प्रकृते तु साध्यत्वसामानाधिकरण्याभावविषयत्वे

न किंचिद्बाधकमस्तीत्यतो बाधकमाह सत्तानेति। तथा च सत्तायां द्रव्यवृत्तित्वाभाववत्त्वे द्रव्यवृत्ति
त्वाभाववद्भिन्नधीस्तत्र न स्यादिति भावः। ननु द्रव्यवृत्तित्वाभाववत्त्वतद्भेदोऽप्यव्याप्यवृत्तिरेव
वाच्यः। तथा च द्रव्यगुणात्मकैकविभिन्नावच्छेदेन सत्तायां तयोः सन्निवेशात्कुतो विरोध इत्यत
आह द्रव्यवृत्तित्वाभाव इति। नन्वेवं वृक्षे मूलेन कपिसंयोग इति प्रतीत्या वृक्षादौ कपिसंयोगाभा
वोऽपि न सिद्ध्येत् तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूलेऽवगाहनसंभवादत आह बा
धकाभावादिति। संयोगाभावो न वृक्षवृत्तिरित्याप्रत्ययस्य तत्रासत्त्वादिति भावः। ननु द्रव्यवृ
त्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरि
ति प्रत्ययादेकदेशोषस्य कर्त्तुमशक्यत्वात् अभेदारोपात् तस्मादाह अतीन्द्रियपद इति। मनस्त्ववदणुत्वा
दित्यर्थः। तत्रातीन्द्रियसाध्यकेऽसद्धेतौ। ननु प्रत्यक्षासंभवेऽपि अणुत्वं मनस्त्वसामानाधिकर
ण्याभाववन्मनस्त्वाभाववद्वृत्तित्वाद्घटत्ववदित्यनुमानादेव तत्र सामानाधिकरण्याभाव

१९

सेत्स्यतीत्यत आह नन्वेति। तद्वृत्तीति। साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः। तथा चोक्तानुमाने त
द्वृत्तिभिन्नत्वमुपाधिः। तस्य च साध्यव्यापकत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यम्। भे
दस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तिमत्त्वावच्छिन्नभेदोपाधिर्बोध्यः। ननूक्तपाध्यप्रतिसंधानद
शायामुक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिर्भविष्यति। अन्यथाव्याप्यतरस्यापि तत्रा
तिप्रसंगादित्यत आह किंचेति। इदमित्यादि। तथा च कालो गोमान् गोत्वादित्यादौ कालिकसं
बंधेन हेतावव्याप्तिः। तेन संबंधेन हेतुं प्रति महाकाले तेन संबंधेन कालवृत्तित्वाभावस्य कु
त्राप्यसत्त्वात्। न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य सिद्धिः। कालस्य गगना
द्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावस्य कालावच्छेद्यत्वासंभवात् कालिकसंबंधेन गगना
देर्वृत्तिमत्त्वस्वीकाराच्च। यद्यपि गोत्वाधिकरणात् तत्क्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्
क्षणासमानकालीनतत्क्षणगोचरज्ञानेन प्रसिद्धिः। तत्क्षणस्यापि विषयतया स्वविष

यकज्ञानाधिकरणतया तन्निष्ठतादृशवृत्तित्वाभाववत्तायाम् अवच्छेदकत्वसंभवात्॥ तथापि म
हाकाल एव हेतुतावच्छेदककालिकसंबंधेनाधिकरणं न पार्थीनां तु तत्तद्वृत्तितया अवच्छेदकमा
त्रमिति सिद्धांतमनुरुध्येयं॥ महाकालनिरूपितविशेषणतया वाहृतावव्याप्तिर्द्रष्टव्या॥ इद
मिदानीमित्याकारकप्रतीतिनियामकविशेषणतायाः योविशेषस्तेन हेतुतायामिति व्याख्ये
यातादृशविशेषणतायाः प्राप्तेः। सामान्यत एव भिन्नकालीनयोर्नाधाराधेयभाव इति म
तेनानुपपत्तिगंधोपि॥ क्षणानां स्वासमानकालीनज्ञानस्य विषयतयाप्यनधिकरणत्वेन त
दवच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावस्य प्रसिध्यसंभवादिति ध्येयं॥ अत्र हेतुतावच्छेदकसंबंधेन
स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वाभावस्य विवक्षायां न कोपि दो
ष इति॥ साधनीभूतगोत्वाधिकरण्या महाकालावच्छेदेन गोत्वनिरूपितकालिकसंबंधेन सा १७
ध्यवद्वृत्तित्वाभावस्य घटादावप्रसिद्धत्वात्॥ साध्यसामानाधिकरण्यपत्वं यद्धर्मावच्छिन्नाधि

करणावच्छेदेन हेतुवृत्तिकात्यंताभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं वा विवक्षितं॥ इत्थं च वा
च्यप्रमेयादित्यादौ प्रमेयव्यक्तीनां भेदेपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः॥ केचित्तु स्वनिष्ठ य
त्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यतद्भावाधिकरणाभिन्नत्वमित्यर्थः॥ तादृशाभावाधि
करणत्वं सद्धेतुस्थले स्वाभिन्नव्यक्तावेवाप्रसिद्धं अतो नाव्याप्तिरित्याहुः॥ साध्यवद्वृत्तित्वाभा
वाधिकरणत्वसामान्ये यन्निष्ठत्वपूर्वाधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिः। पर्वतीयत
यादिनिष्ठपर्वतावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणत्वं न तद्धर्मनिष्ठं पर्वतीयधूमनिष्ठं त
न्नधूमाधिकरणावच्छेद्यं अधिकरणभेदेनाभेदात्॥ धिकरणत्वअन्यथा पर्वतीयरूपेण वह्नि
मत्संयुक्तत्वमिति वत्सर्वतैः धूमेन वह्निमत्संयुक्तत्वमित्यादि प्रतीत्यापत्तेरतो वह्निमान्धूमादि
त्यादौ नाव्याप्तिः। व्याप्यत्वेतरावच्छेदकतास्वीकारे तु तादृशाधिकरणत्वसामान्ये यत्पूर्वाधिक
रणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुद्दहरत्वादुपेक्षितं। वा

व्यत्वादिसाध्यकेतादात्म्येन हेतावव्याप्तेः। वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः। एतेन सत्तायां
कर्मण्विनद्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मण इव कर्मसत्तयोः समवायस्याप्यवच्छेद
कत्वं भासते। अन्यथा इदानीं सत्तापानद्रव्यत्वसामानाधिकरण्यमित्यपि प्रतीत्यापत्तिः। एत
त्कालस्य कर्मानतिरेकात्। एवं च यद्धेतुव्यक्त्यधिकरणीयपद्धेतुतावच्छेदकसंबंधेसाध्यवद्वृत्ति
त्वाभावावच्छेदके नास्ति तत्त्वमित्यर्थः। कालो गोमान् गोत्वादित्यादौ कालवृत्तित्वाभावावच्छेदक
तत्वस्य द्रव्यत्वादिनिष्ठसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसंबंधविरहान्नाव्या
प्तिरिति संक्षेपः॥ ॥श्रीगजानन॥ श्रीः॥ नन्वीश्वरेच्छादिरूपवाच्यत्वस्य गुणत्वादिसमवायि
त्वात्। समवायित्वं कुतः तद्व्यधिकरणधर्म इत्यत आह वाच्यत्वमिति। अस्मात्शब्दादयमर्थो बो
द्धव्य इतीश्वरेच्छाविषयत्वं पदार्थान्तरं वा वाच्यत्वं न तु तादृशेच्छामात्रं। अतिप्रसक्तत्वात्। तच्च न
कस्यापि समवायीति भावः। समवायितयेति। मूलस्य समवायिकारणतयेत्यर्थ इत्याकुः।

१८

नन्विदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावरूपसाध्याभावस्याप्रसिद्धावपि
प्रमेयवान् वाच्यत्वादित्यादिकेवलान्वयिनि तदप्रसिद्धेरनुद्धारात्। मूलस्य न्यूनत्वमत आह
प्रमेयेति। भावत्वेनेति। भावत्वेनाभावानामभावः सर्वत्र स्फलभ इत्यन्वयः। ननु भावत्वेनाभा
वो नास्ति इति प्रतीतिरभावस्यैव प्रतियोगित्वमवगाहते। न चैतावता प्रमेयमात्रप्रतियोगि
काभावप्रसिद्धिरत आह वन्हित्वेनेति। वन्हित्वेन निर्वन्हो ऽभावः स्फलभ इति योजना। ननु व
न्हित्वेन प्रमेयं नास्तीति प्रतीतिः प्रमेयवन्हिमात्रप्रतियोगिकाभावमवगाहते न तु प्रमे
यसामान्याभावप्रतियोगित्वं। वन्हिमतितादृशप्रतीत्यनुत्पत्त्या वन्हिप्रतियोगिकाभावा
वगाहित्वस्यावश्यकत्वादत आह अद्यतीति। तथा च गगनत्वेन प्रमेयं नास्तीति प्रतीत्यैव
प्रमेयसामान्याभावसिद्धिः। न हि तत्रापि गगनमात्रप्रतियोगिकत्वं भासत इति वक्तुं शक्य
ते। विनिगमकाभावेन प्रमेयमात्रप्रतियोगिकत्वावगाहने बाधकाभावात्। कालिकादिसं

बंधेनगगनत्वादिविशिष्टस्यप्रमेयस्यसर्वत्रनाभावःसंभवतीत्यतउक्तमवृत्तिमात्रवृत्तीति।तथा
चयादृशसंबंधेनगगनत्वादेरवृत्तिमात्रंतादृशसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकोगगन
त्वादिनाप्रमेयसामान्याभावोवाच्यइतिभावः।ननुकालिकसंबंधेनप्रमेयसाध्यकेतेनैवसंबंधे
नसाध्याभावस्यप्रसिद्धिः कार्यासाचकालिकसंबंधेनगगनत्वेनप्रमेयंनास्तीतिप्रतीत्यानसंभ
वतीति।तत्संबंधेनगगनादेरवृत्तिमत्वमतेतादृप्रतीतेर्गगनवृत्तिप्रतियोगिताकत्वावगाहित
त्वेवोपपत्तौप्रमेयांतरप्रतियोगिकत्वकल्पनेमानाभावादतआहयदिरुद्धेति।घटत्वपटत्वाभ्यां
प्रमेयंनास्तीतिप्रतीत्यानिखिलप्रमेयप्रतियोगिकःतत्राप्यभावःफलभरइतिभावः।इद
मुपलक्षणं।संयोगादिसंबंधेनघटत्वादिकमपिप्रमेयत्ववद्वृत्तीतितत्संबंधेनघटत्वाद्यवच्छि
न्नप्रतियोगिताकप्रमेयसामान्याभावोबोध्यः।अप्रसिद्धिदोषस्यैवसत्वान्मूलेप्रतियोग्य
वृत्तिश्चेतिदोषांतरंकिमित्युपात्तं।अतस्तदवतारार्यमाशंकतेनन्विति।पारिभाषिकमेवेत्य　१८

वकारेणनव्यभिचारः।व्यभिचारइतियोगार्थोव्यवच्छिद्यते।अव्यभिचरितत्वमिति।अथेदंवाच्यत्वेय
त्वादित्यादिग्रंथाभिप्रेतमितिशेषः।तथाचनचैवंघटत्वादिमूलस्यकेवलान्वयितोव्यभिचारित्वे
नालक्ष्यताप्रदर्शनपरत्वान्नपूर्वमूलासंगतिरितिध्येयं।यदित्यादि।अत्रयत्समानाधिकरणाइ
त्यनुक्तोसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वसामान्याभावस्य
यावदंतर्गतत्वात्तस्यचव्यापकताघटकसमवायसंबंधेनप्रतियोग्यधिकरणकेनापिसंबंधे
नावृत्तित्वादयमात्माज्ञानादित्यादावव्याप्तिरतस्तदुपात्तमित्यग्रेस्फुटीभविष्यति।नचात्मत्वा
द्यभावोपिसमानकालीनत्वादिसंबंधेनप्रतियोग्यधिकरणेवृत्तिः।तथाविधसंबंधानांवृत्त्यनि
यामकत्वात्।क्वचिदर्पितेनसंबंधेनवृत्तित्वाप्रतीतेः।इत्थंचहेतुसमानाधिकरण्यत्वमपिहेतुता
वच्छेदकसंबंधेनहेत्वधिकरणाधेयताग्राह्य॥तेनात्मत्वाद्यभावस्यापिहेत्वधिकरणासंबंधित्वा
न्नोक्तदोषतादवस्थ्यं।नचहेतुसमानाधिकरणइत्यपहायसाध्यसमानाधिकरणास्तादृशाः

यावंतोऽभावाः स्वविशिष्टयद्धर्मावच्छिन्नहेत्वधिकरणावृत्तेर्नप्रतियोगिसमानाधिकरणा
इत्येवकृतो नक्तं लक्षणमितिवाच्यं। द्रव्यमात्मत्वादित्यादौ महाकाले साध्यसमानाधिकरणा
स्यद्रव्यत्वसामान्याभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या तत्राव्याप्तिप्रसंगात्। यत्तु। यत्स
मानाधिकरणाः यावंतस्तादृशाभावाः साध्यसमानाधिकरणास्तत्वमित्येवास्तु लक्षणं।
स्वस्वप्रतियोगिसमानाधिकरण्यप्रवेशो बीजाभावादिति। तत्तुच्छं। तथासति यत्समानाधि
करणाः यावंतोऽभावाः साध्यसमानाधिकरणा इत्यस्यैवसंपत्के साध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकप्रतियोगिताका इत्यस्य व्यर्थतापत्तेः। तन्मात्रोक्तौ च विनापि व्यधिकर
णधर्मावच्छिन्नाभावलक्षणासंभवे प्रतियोग्यवृत्तित्वेत्यादिग्रंथावतारानुपपत्तिः। यद्यपि य
त्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावंतोऽ
भावाः दैशिकविशेषणतयोभयवृत्तयस्तत्वमित्येवलक्षणमस्तु स्वस्वप्रतियोगिसामाना २०

धिकरण्यांतर्भावि गौरवात्। हेतुसमानाधिकरणस्य तत्तत्संयोगात्मकान्याभावस्य वदैशिकवि
शेषणतयोभयवृत्तित्वाभावाद्धूमवान्वह्नेरित्यादावतिव्याप्तिविरहादिति। तन्मंदं। हेतुसमा
नाधिकरणस्य वह्निसंयोगाद्यात्मकाभावस्य दैशिकविशेषणतयोभयवृत्तित्वविरहेणाव
ह्निमान्धूमादित्यादावव्याप्तिप्रसंगात्। नच भावभिन्नस्यैव हेतुसमानाधिकरणाभावस्य प्र
वेशान्नदोष इतिवाच्यं। तद्घटभिन्नं घटत्वादित्यादावतिव्याप्त्यापत्तेः। तद्घटभिन्नत्वाद्यभावस्य
तद्घटत्वादिस्वरूपत्वेन भावत्वात्पटत्वादिना तद्घटभेदाद्यभावस्य चोभयवृत्तित्वादित्यलंप
ल्लवितेन। अस्मच्चरणास्तु यत्पदं यद्रूपावच्छिन्नपरं। अयेतत्वमित्यस्य हेतुतावच्छेदकीभूततद्धर्मवत्वमर्थः।
तेन सकलधूमव्यक्त्यननुगततायां वह्निव्याप्तेर्नालाभः। न चात्मत्वान्यत्वे सति आत्मम
नःसंयोगादित्यादौ मनसि हेतुसमानाधिकरणस्यात्मत्वसामान्याभावस्य स्वविशिष्टहेतु
तावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्धिनिबंधनाव्याप्तिः। यत्तु द्रव्यं गुणकर्मान्यत्वे सति

सत्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वाद्यभावस्यातथात्वाद्व्याप्तिरतो यत्पदस्य यद्धर्मावच्छि
न्नपरत्वमिति भावः। तन्नाद्रव्यत्वाद्यभावस्यापि कालिकसंबंधेन यद्धेतुतावच्छेदकावच्छिन्नहेत्वधि
करणं जन्यद्रव्यादि तत्र वृत्तेरनप्रतियोगिसामानाधिकरण्याभावात् अव्याप्तिविरहात्॥ साध्येत्यादि। साध्य
तावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदिका यद्भावप्रतियोगितास्तादृशाभावादित्य
र्थः। अत्र च विशिष्टसत्तावान्जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्यैव सन्नारूपसाध्यव्याप
कतावच्छेदकप्रतियोगिताकतया तस्य च स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधि
करण्यादिति व्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति। तथा च द्रव्यत्वाभावस्यैव निरुक्तयावदभावां
तर्गतस्यातथात्वान्नातिप्रसंगः। साध्यवत्त्वं चात्र साध्यतावच्छेदकसंबंधेन निवेश्यं। तेन नस्क मा
त्रस्यापि विषयतासंबंधेन ज्ञानवत्त्वाद्धूटत्वादिना वाच्यत्वाद्यभावस्यैव साध्यतावच्छेदकावच्छिन्न
व्यापकतावच्छेदकप्रतियोगिताकत्वेपि समवायेन ज्ञानस्य साध्यत्वे द्रव्यत्वादिहेतौ नातिव्याप्तिः।

समवायसंबंधावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकस्यात्मत्वाद्यभाव
स्यैव प्रतियोग्यसमानाधिकरणत्वात्। अत्र च साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन
विशेषणीयः। तेन साध्यवन्मात्र एव समवायित्वावच्छिन्नवाच्यत्वाभावप्रतियोगित्वेन घटाद्यभाव
त्वेनापि न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकाभावाप्रसिद्धिः। इत्थं च तत्त
त्संबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो यस्तदन्यत्वे सति तत
त्संबंधावच्छिन्नाया आधेयतावच्छेदकत्वरूपं साध्यव्यापकत्वं निरूप्य तादृशव्यापकतावच्छेदिकाय
द्भावप्रतियोगिता तादृश्यभावाः प्रवेशनीयाः। न च तत्संबंधावच्छिन्नाधेयतेत्यादिकं व्यर्थं। संयोग
संबंधेन द्रव्यत्वाद्यभावस्य साध्यव्यापकताघटकीभूतसंयोगादिसंबंधेन प्रतियोगिसामानाधिक
रण्याप्रसिद्ध्या सद्धेतुमात्र एवासंभवस्य वारणार्थं। तदुपादानात्। संयोगसंबंधावच्छिन्नाधेयत्व
स्य द्रव्यत्वादावसत्वेन द्रव्यत्वादिनिष्ठप्रतियोगित्वस्य तादृशाधेयतानवच्छेदकत्वात्॥ तत्संबंधेनसा

वच्छिन्नानधिकरणत्वं च तत्संबंधेन स्वावच्छिन्नाधिकरणसामान्यभेदः। तेन वन्ह्यादिनिष्ठप्रति
योगित्वावच्छिन्नाधिकरणगगनोभयभेदस्य पर्वतादिनावन्ह्यादिनिष्ठप्रतियोगितावच्छिन्ना
धिकरणभेदस्य च वन्ह्यादिसाध्यवतिसत्वेपि न क्षतिः। अत्राभावा इति। स्वरूपकथनं। वस्तुत
साध्यवन्निष्ठाभावस्य तत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्व
मेव तत्संबंधेन साध्यव्यापकतावच्छेदकत्वं वाच्यं। सामानाधिकरण्योपादानात् व्यधिकरण
धर्मावच्छिन्नाभावमादाय नासंभवः। तत्र च साध्यवन्निष्ठत्वमभावस्य स्वरूपसंबंधेन ग्राह्यं।
तेन स्पंदः कालत्वादित्यादौ स्पंदत्वाद्यभावस्यापि कालिकसंबंधेन साध्यवतीवृत्त्यस्यावद
नंतर्गतत्वात्। वाच्यत्वाद्यभावस्य तादृशस्य प्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिः।
इत्थं च जातिसामान्याभावादेरपि वन्ह्यादिव्यापकतया तत्प्रतियोगितावच्छेदकस्य जात्यादिरूप
स्य हेतुसमानाधिकरणाभावस्य जातिसामान्याभावात्मकप्रतियोग्यसमानाधिकर

२२

णत्वादसंभवापत्तेरतो अभावा इत्युक्तं। भावभिन्ना इति च तदर्थः। यथा च सामानाधिकरण्येना
वच्छेदकत्वघटितायां व्यापकतायां न दोषस्तथाऽग्रे प्रपंचयिष्यते। नव्यास्तु। साध्यतावच्छेदकेत्यादि।
साध्यतावच्छेदकावच्छिन्नाधिकरणानि यावंति तत्प्रत्येकवृत्तिवृत्तिप्रतियोगिताकेत्यर्थः। न च एकमा
त्रवृत्तिसाध्यकसद्धेतावव्याप्तिः। तत्र यावत्त्वस्य अनुपादेयत्वात्। शब्दस्याकिंचित्करत्वात्। यद्वा साध्य
तावच्छेदकावच्छिन्नसमानाधिकरणाः यावंतो धर्मास्तत्प्रत्येकसमानाधिकरणवृत्तिप्रतियोगिता
केत्यर्थ इति प्राहुः। यत्तु साध्यवदवृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगिताकेत्यर्थ इति तन्न।
केवलान्वयिसाध्यकसद्धेतौ तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तेर्गगनस्वरूपाभावस्य तादृशत्वे
पि हेतुसमानाधिकरणत्वासंभवादिति। अत्र व्यापकतावच्छेदकप्रतियोगिताकेत्यत्र व्यापकता
या अवच्छेदो यत्रेति बहुव्रीहौ कप्रत्ययः। तेन प्रतियोगितायाः सममवच्छेदकपदस्य समासे कोप
धस्येव पुंवद्भावनिषेधादित्यपि युक्ताः। सर्वत्रेति। सद्धेतौ असद्धेतौ चेत्यर्थः। तथा च यावत्त्वानु

कावतिव्याप्तेरेवस्यान्नाव्याप्तिरिति भावः। सकलवाच्यव्यभिचारिणीत्यर्थ इत्यन्ये। केचित्तु स
र्वत्रेति। सकलहेत्वधिकरणावच्छेदेनेत्यर्थ इत्यप्याहुः। वाच्यत्वाभावस्येति। घटत्वादिनावाच्यत्वा
भावस्येत्यर्थः। तथात्वात्। प्रतियोगिसमानाधिकरणत्वात्। तथा च धूमवान् वह्नेरित्यादाव
तिवारणार्थमेव यावत्पदमिति भावः। ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावद
भावो क्वैव वाच्यत्वाद्यभावमादाय उक्तस्यातिप्रसंगस्य व्युदाससंभवात्। साध्यतावच्छेदकाव
च्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादानं गौरवग्रस्तमत आह अत
एवेति। निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः। अन्यथाभूतत्वाद्यभावस्य साध्यतावच्छेदकव्या
पकप्रतियोगिताकान्यत्वात्। भूतत्वमूर्तत्वोभयत्वाद्यवच्छिन्नाभावस्य च तादृशप्रतियोगिता
कस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिस्यादिति
भावः। यत्तु साध्यप्रतियोगिकोयः किंचिदभावः यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्र

२३

तियोगिसमानाधिकरणस्तद्धर्मवत्त्वमित्येव लक्षणमस्तु। कृतं यावद्गर्भनिरुक्त्या। धूम
वान् वह्नेरित्यादौ घटत्वेन धूमाभावस्य तादृशहेत्वधिकरणावच्छेदेन प्रतियोगिसमाना
धिकरणत्वादतिव्याप्तिव्युदासादित्याशंक्य अत एवेत्यादिकमवतारयंति तन्तुच्छं। ताद
शाशंकायां धूमवान् वह्नेरित्यादिप्रसिद्धस्थल एव वह्निधूमोभयत्वावच्छिन्नाभावमादायाति
व्याप्तिसंभवे भूतत्वमूर्तत्वोभयवान्नित्याधनुधावनस्य संदर्भविरोधापत्तेः। यद्यपि यादृशाभावस्य
प्रतियोगितायाः व्यापकं साध्यतावच्छेदकं तादृशः कश्चिदभावो यद्धर्मावच्छिन्नाधिकरणावच्छेदे
न प्रतियोगिसामानाधिकरण्यस्तद्धर्मवत्त्वं व्याप्तिरित्युक्तावेव वाच्यत्वाभावमादायोक्तातिव्याप्ति
वारणसंभवाद्यावत्त्वगर्भलक्षणं गौरवग्रस्तं। अत उक्तं अत एवेति। तदाप्यसंगतं। प्रतियोगि
तामात्रस्यैव प्रत्येकपर्यवसिततत्वेन वह्निधूमोभयत्वादेस्तद्व्यापकत्वासंभवात्। वह्निधूमोभयवा
न्धूमादित्यादाव व्याप्तिभयेन तादृशनिरुक्तेः शंकितुमशक्यत्वात्। ननु प्रतियोगिसामानाधि

करण्यमित्यत्रप्रतियोग्यधिकरणत्वं साध्यनिरूपितसाध्यतावच्छेदकसंबंधेन ग्राह्यमित्यलं यावन्नि
वेशेनेत्यत आह अत एवेत्यादीत्यपि वदंति। नव्यास्तु। ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्न
साध्यनिष्ठयादृशप्रतियोगिताकोपि किंचिदभावः यदधिकरणावच्छेदेन तादृशप्रतियोगिताश्र
यसमानाधिकरणस्तत्त्वमित्यस्यैव सम्यक्त्वे यावत्त्वगर्भलक्षणारंभो गौरवग्रस्तः। प्रमेयवान्वा
च्यत्वादित्यादौ विरुद्धघटत्वपटत्वोभयगगनाद्यवच्छिन्नप्रतियोगिताकप्रमेयाभावमादायैव
लक्षणसंभवात्। गगनादेर्वृत्तिमत्त्वलक्षणधर्मत्वाभावात्॥ प्रतियोगित्वं च सामान्याभावातिरि
क्ताभावस्य स्वरूपसंबंधेन प्रत्याश्रयविभिन्नमतो विरुद्धघटत्वपटत्वाभ्यां प्रमेयमात्रस्याभा
वमादायैव धूमवान्वह्नेरित्यादौ नातिप्रसंगः। न चात्र वह्निछिन्नांतवैयर्थ्यं। वह्निधूमोभयत्वा
वच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिवारकत्वात्। साध्यनिष्ठपदमपि तदर्थ
मेव। अन्यथा गगनाद्यवच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावमादाय व्यभिचारिमात्रे

२८

तिव्याप्यापत्तेरित्यत आह अत एवेति। इत्थं च भूतत्वविशिष्टमूर्तत्वाद्यभावस्य साध्यताव
च्छेदकातिरिक्तधर्मावच्छेद्यप्रतियोगिताकतया न तस्य प्रतियोगिसामानाधिकरण्यं नातिव्या
प्तिसंपादकमितीत्याशयेन द्वित्वाद्यवच्छिन्नाभावपर्यंतस्य प्रतियोगिसामानाधिकरण्याभि
धानमपि साधु संगच्छते। परंतु प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताकोपः कश्चि
दभावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्वमेव अव्यभिचरितत्वं कुतो
नोक्तं। भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगिताव्यक्तेस्तादृशोभयात्मकसाध्यव्याप्यतावच्छेद
कत्वाभावादेव तादृशोभयाभावमादायातिव्याप्त्यसंभवात् इति विभावनीयमिति प्राहुः। कि
चित्तु ननु साध्यतावच्छेदकावच्छिन्नपदस्य व्यर्थतया साध्यव्यापकतावच्छेदकप्रतियोगिता
काभाव एव यावत्त्वविशेषणं उचितमित्यत आह अत एवेति। उक्ताभावयावत्त्वोपादानादेव
त्यर्थ इति प्राहुः। भूतत्वमात्मभिन्नत्वे सति विशेषगुणवत्त्वं। तच्च न व्यापकतायाः प्रति

योगिवैयधिकरण्याघटितत्वकत्वेन भूतत्वमूर्तत्वोभयस्य व्यापकं तादृशोभयघटितघटादौ तत्त्वतिलक्षणा
वच्छेदेन विशेषणताघवच्छिन्नाभावसत्त्वादत उक्तं मनोन्यत्वेति। साध्यस्यैवाभावमादाय नातिव्याप्तिन
स्तरां वस्त्वंतरस्येति केचित्। मुतिकन्यायेनोक्तं मनोन्यत्वे सतीत्यपि वदंति। अत्र तथात्वादिति। स्वविशिष्टहे
त्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादित्यर्थः। अत एव व्यभिचारादिति भावः। ननु यत्स
मानाधिकरणाः यावंतोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छे
दकावच्छिन्ने सादिकं व्यर्थं न च साधनसमानाधिकरणगोत्वाद्यभावस्य हेत्वधिकरणावच्छेदेन प्रति
योग्यसमानाधिकरणत्वात् असंभव इति वाच्यं। तस्यापि पूर्वक्षणवृत्तित्वविशिष्टत्वाभावात्मकं प्रति
योगिसमानाधिकरणत्वात्। न चैवं रीत्या व्यभिचारिण्यतिव्याप्तिरिति वाच्यं अभावस्य स्वप्रति
योगितासमानाधिकरणधर्मावच्छिन्नस्वकीयप्रतियोगिताश्रयसामानाधिकरण्यतदन्यप्रति
योगितायाः एव व्याप्यवृत्तितानिरूपकतया धूमाभावस्य पूर्वक्षणवृत्तित्वविशिष्टत्वाभावनिष्ठप्रति

योगितायाः अतथात्वेन धूमवान् वन्हेरित्यादौ अतिव्याप्त्ययोगादत आह साधनेत्यादि। गोत्वादित्या
दिपदेन गगनादिसंग्रहः। तथा च तद्दलानुक्तावसंभव एवेत्यादि इति भावः। ननु यत्समानाधिकरणाः
साध्यप्रतियोगिताकाभावाः साध्यतावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणास्तत्त्वमित्ये
व वाच्यतां। तावतैव गोत्वाद्यभावमादाय असंभवस्य व्युदासादत आह तत्तदिति। तथा चोक्तविवक्षा
यां द्रव्यत्वाद्येकव्यक्तिसाध्यकसद्धेतौ लक्षणसंभवेऽपि वन्हिमान् धूमात् ज्ञातिमान् सत्वादित्यादौ
साध्यप्रतियोगिकानां तत्तद्व्यक्त्यभावानां आत्मत्वाद्यभावानां च प्रतियोग्यसमानाधिकरण
त्वादव्याप्तिरिति भावः। न च साध्यव्यापकप्रतियोगिकात्यंतस्यैव सम्यक्त्वे व्यापकतावच्छेदक
प्रतियोगिताकपर्यंतं व्यर्थमिति वाच्यं। तत्तत्साध्यव्यक्तीनां गगनादीनां च प्रमेयत्वादिप्रका
रेण साध्यव्यापकतया तदभावमादाय असंभवापत्तेः। ननु वृत्तित्वसतितत्संबंधावच्छिन्नाधे
यताशालित्वेनापि प्रतियोगिनो विशेषणीयत्वात् गगनादेर्व्युदासः स्यात् अनधिकरणसाध्य

वन्हिष्टाभावाप्रतियोगित्वेनसाध्यव्यापकत्वं निरुच्यते प्रतियोगिताकाभावएव निवेश्यतामि
तिवाच्यं। तस्यलक्षणांतरत्वापत्तेः लक्षणस्यादुष्टत्वादितिभावः। यत्समानाधिकरणाप्रसिद्धा
वपितत्संबंधेनसद्धेतौनाव्याप्तिः। अतएवात्वपीति। प्रतियोग्यधिकरणवृत्तित्वविरहेपीत्यर्थः। यद्य
पिप्रतियोगिसामानाधिकरण्यमवश्यंस्वविशिष्टहेत्वधिकरणावच्छेदेनाग्रेविवक्षणीयात्तथाचहे
तुतावच्छेदकसंबंधेनहेत्वधिकरणानुक्तौकालिकसंबंधेनधूमस्याधिकरणेमहाकालेवर्तमान
स्यप्रलयान्यत्वाभावस्यापियावदंतर्गतत्वात्। स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्यावन्हिमान्धूमा
दित्यादावव्याप्तिसंभवतितथापिस्वविशिष्टहेत्वधिकरणेत्यादेरुक्तावनुक्तौचोभयथापिअयमा
त्माज्ञानादित्यादावव्याप्तिः। वन्हिमान्धूमादित्यत्रतुस्वविशिष्टत्वस्याप्युक्तत्वेवतथेत्याशयेनप्रसिद्धो
दाहरणंपरित्यक्तं। एतन्महाकालस्यैवप्रलयान्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसंभवात्। स्व
विशिष्टत्वयुक्तावपिवन्हिमान्धूमादित्यादौनाव्याप्तिः। महाकालस्यहेतुनाघटकस्य संयोग २९

संबंधेनधूमाधिकरणताभावेपिहेतुसंबंधित्वानपायात्। तादात्म्यहेतुसंग्रहार्थंहेतुतावच्छेदक
संबंधेनयोहेतुसंबंधितद्वृत्तियावदभावानामेवनिवेश्यत्वादितिमते। तत्तुच्छं। संयोगमात्रेणधूम
हेतोःप्रभामंडलादौवन्हिव्यभिचारितयापर्वतादिनिरूपितसंयोगेनैवतस्यहेतुत्वात्तादृशसंयो
गेनचधूमस्याधिकरणेपर्वतादौप्रलयत्वादिस्वरूपस्यप्रलयान्यत्वाद्यभावस्यैवाप्रसिद्ध्याप्र
सिद्धावश्यकत्वात्। भिन्नकालीनयोर्विषयतान्यसंबंधसामान्येनैवाधाराधेयभावविरहा
दितिदिक्। ननुपृथिवीत्ववान्महाकालत्वात् महाकाले कपालान्यतरत्वादित्यादावतिव्या
प्तिःसाधनसमानाधिकरणस्यमहाकालान्यत्वाद्यभावस्यापिहेत्वधिकरणमहाकाला
वच्छेदेनकालिकसंबंधेनैवप्रतियोगिसमानाधिकरणत्वादतआहएवमिति। दलांतरेपिप्र
तियोगिसामानाधिकरण्यदलेपीत्यर्थः। एकसंबंधेनव्यापकत्वमन्यसंबंधेनप्रतियोगिसामा
नाधिकरण्यमित्येवंसंबंधभेदनिबंधनप्रोक्तातिव्याप्तिरूपोदोषः। साध्यव्यापकताघटक

संबंधेनसाकंप्रतियोगिसामानाधिकरण्यघटकसंबंधस्यैक्यविवक्षया निरसनीय इत्यर्थः
पत्संबन्धेनस्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्तदन्यप्रतियो
गिताकः साध्यवन्निष्ठाभावीयतत्संबन्धावच्छिन्नप्रतियोगितायाः समानाधिकरणावच्छेदका
न्यप्रतियोगिताकोवायोऽभावस्तस्यतादृशसंबन्धेनप्रतियोगिनोयदधिकरणं तद्वृत्तित्वंविवक्षि
तमितिफलितोर्थः। पृथिवीत्वाद्यभावप्रतियोगित्वंतुनकालिकसंबंधेनपृथिवीत्वादिव्यापक
तावच्छेदकंनित्यपृथिव्यांव्यभिचारात्। किंतुसमवायेनैवतेनचसंबन्धेनपृथिवीत्वाद्यभावस्य
हेत्वधिकरणमहाकालावच्छेदेनप्रतियोगिसामानाधिकरण्याभावान्नोक्तातिव्याप्तिरितिभा
वः। यत्तुयेनसंबंधेनव्यापकत्वंतेनसंबंधेनप्रतियोगिसामानाधिकरण्यंकावपिनित्यज्ञानंनि
त्यसविषयकत्वादित्यत्रातिव्याप्तिः। साधनसमानाधिकरणस्येश्वरेच्छाभिन्नत्वाद्यभावस्या
पिसाध्यव्यापकताघटकविषयितासंबंधेनयावद्धेत्वधिकरणप्रतियोगिसमानाधिकरण २७

त्वात्। नचयेनसंबंधेनव्यापकत्वंतेनतेनसंबंधेनप्रतियोगिसामानाधिकरण्यविवक्षणान्नोक्त
दोषः। तथासतियावत्पदवैयर्थ्यापत्तेः। विशेषणतासामान्येनैवसाध्यवन्निरूपितविशेषण
तयापिवाच्यत्वापेःसाध्यव्यापकतयाघटत्वादिनावाच्यत्वाद्यभावस्यैवतादृशसंबंधेनहेत्व
धिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यविरहाद्धूमवान्वह्नेरित्यादौव्यभिचारि
ण्यतिव्याप्तिसंभवादिति। तन्नरं। विषयितासंबंधेनव्यापकतायाएवअसत्वाद्विषयितासंबंधे
नस्वावच्छिन्नाधिकरणत्वाप्रसिध्यास्वावच्छिन्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायाः
तेनसंबंधेनअसंभवात्। नचतेनसंबंधेनस्वावच्छिन्नासंबंधित्वमेवव्यापकतायांनिवेशनीयं।
त्वदुक्तातिप्रसंगभयेनैवतस्यानिवेशनीयत्वात्। नचतत्संबंधावच्छिन्नायाःसाध्यवन्निष्ठाभा
वप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकधर्मवत्त्वलक्षणंव्यापकत्वंविषयितासंबं
धेनसुलभं। साध्यवतिनित्यज्ञानवत्त्वमात्रस्यैवविषयितासंबंधेनसत्वेपिनित्यज्ञानान्य

त्वविशिष्टस्यघटादेर्विषयितासंबंधेनाभावस्यतत्रसत्वेबाधकाभावादितिवाच्यं।विषयितायाश्चस्य
नियामकतयातत्संबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः।यदपिमनस्त्ववदणुत्वादित्यत्रातिव्याप्तिः।
अणुत्वसमानाधिकरणमनस्त्वाद्यभावस्यापिसाध्यव्यापकताघटकादिकृतविशेषणतया
सर्वत्रैवपरमाणौप्रतियोगिसमानाधिकरणत्वादिति।तदपितुच्छं।नित्यानामव्यावर्त्तकत्वात्।
जन्यानामेवमूर्त्तानांदिगुपाधितयापरमाणौदिक्कृतविशेषतयाकस्याप्यसत्वात्तेनापिसंबंधेन
साध्यव्यापकत्वविरहात्।अन्यथावस्तुमात्रस्यैवकालोपाधित्वसंभवात्तदपिजन्यमात्रस्यन
स्यात्।अतएवप्रलयदशायांदिग्देशविभागोनास्तीतिसिद्धांतस्संगच्छते।अन्यथापरमाणूनां
सत्वात्तदानीमपिदिग्देशविभागप्रसंगादितिदिक्।यदिचस्पंदोमाहाकालत्वादित्यादावतिव्याप्तिः
साधनसमानाधिकरणमहाकालान्यत्वाद्यभावस्यापिसाध्यव्यापकताघटककालिकसंबंधे
नमहाकालेप्रतियोगिसमानाधिकरणत्वात्।नचस्पंदइत्याकारकजन्यपत्किंचिद्बोधव्यक्ते

२८

र्विषयतासंबंधेनैवस्पंदत्वव्यापकतयापावदंतर्गतस्यतदभावस्यैवसाध्यव्यापकताघटकवि
षयतासंबंधेनहेत्वधिकरणेमहाकालेप्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिर्नहिता
दृशबोधव्यक्तेःकालिकसंबंधेनापिस्पंदत्वव्यापकत्वंभाविभूतस्पंदेव्यभिचारादितिवाच्यं।विषय
तायाःज्ञानसमानकालीनतयातद्बुद्धिव्यक्त्यभावदशायामेवस्पंदत्ववतिविषयतासंबंधेनतद्बु
द्धिव्यक्त्यभावसत्वाद्विषयतासंबंधेनस्पंदविषयिताकजन्यबुद्धेःसाध्यव्यापकत्वासंभवात्।किंच
व्यधिकरणधर्मावच्छिन्नाभावस्यासत्वेपिव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादायवक्त्रे
वत्वान्वयिसाध्यकस्थलेलक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिमूलस्यदूषकत्वानुपपत्तेश्च।नच
साध्यवन्निष्ठाभावीयप्रतियोगितायास्सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वरूपव्यापकतायां
व्यधिकरणधर्मावच्छिन्नाभावमादायासंभवधारकस्यसामानाधिकरण्येनत्यस्यव्यर्थतायामेव
तन्मूलग्रंथस्यतात्पर्यमितिवाच्यम्।सामान्यधर्मेणविशेषाभावमादायव्यापकत्वाप्रसिद्धेर्वा

रणार्थमेवसामानाधिकरण्यदलस्यव्यापकतायामवश्यंनिवेशनीयत्वादित्यादिकंयदिविभा
व्यतेतदासंबंधैक्यविवक्षयेतिग्रंथस्यसाध्यव्यापकत्वस्यतदवच्छेदकप्रतियोगित्वस्यप्रतियोगिसा
मानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वस्यचैकसंबंधावच्छिन्नत्वविवक्षयेत्यर्थः।तथाच
स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताकाःयावंतोऽभावाः
स्वप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणाइत्यर्थलाभाद्यावत्तदंतर्गतस्यसम
वायादिसंबंधेननित्यज्ञानत्वमनस्त्वस्पर्शत्वाद्यभावस्यस्वप्रतियोगितावच्छेदकीभूतसमवायादि
संबंधेनयावद्वृत्त्वाधिकरणेप्रतियोग्यसमानाधिकरणत्वात्।नित्यज्ञानंनित्यसविषयकत्वात्म
नस्त्वमणुत्वात्स्पर्शोमहत्कालत्वादित्यादौनकुत्राप्यतिव्याप्तिः।नचैवंवाच्यंज्ञेयत्वादित्यादाव
व्याप्तिः।व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्यैवतत्रलक्षणघटकतयातस्यप्रतियोगि
तावच्छेदकसंबंधसत्त्वेमानाभावादितिवाच्यं।स्वरूपसंबंधेनघटत्वादिनावाच्यत्वंनास्तीत्या

२९

दिप्रतीत्यनुरोधेनतादृशाभावस्यापिप्रतियोगितावच्छेदकसंबंधस्वीकारात्॥अन्यथाभूतलेसंयोगे
नघटत्वावच्छिन्नपटवदित्येवंनिर्णयसत्त्वेपिभूतलेसंयोगेनघटत्वेनपटोनास्तीतिप्रतीत्यापत्तेः।न
चैवमपसिद्धांतः।व्यधिकरणधर्मावच्छिन्नोपिचेदभावःप्रामाणिकःतदासर्वस्मिंस्संबंधेस्तत्प्रतियोगि
ताअवच्छिन्नांनामितिग्रंथकृतैवसामान्याभावेवक्ष्यमाणत्वात्।केचित्तुसंबंधैक्यविवक्षयेत्यस्यसा
ध्यवत्त्वंसाध्यव्यापकत्वंप्रतियोगित्वंप्रतियोगिसमानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वं
चैकेनसाध्यतावच्छेदकसंबंधेनविवक्षणीयमित्यर्थः।तथाचसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्य
व्यापकतावच्छेदकीभूततादृशसंबंधावच्छिन्नप्रतियोगिताकाःयावंतोऽभावाःसाध्यतावच्छेदक
संबंधेनप्रतियोगिसमानाधिकरणाइत्यर्थलाभान्नकुत्राप्यतिव्याप्तिः।नचप्रतियोगितायाःसा
ध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणंव्यर्थमितिवाच्यं।तदनुक्तौवाच्यत्वादिभेदमादायैवकेवलान्व
यिसाध्येलक्षणसंभवेप्रतियोग्यवृत्तित्वादिमूलतन्निराकरणस्यासंगत्यापत्तेः।नचैवमपिस

र्त्रवान्मत्वाद्यभावस्येत्यादिग्रंथविरोधः। वाच्यत्वादेः संयोगादिसंबंधेन धूमाद्यव्यापकत्वादिति वा
च्यम्। वाच्यत्वाद्यभावस्येत्यत्रादिपदसत्त्वाद्यत्रस्वरूपसंबंधेन साध्यता तत्र वाच्यत्वाद्यभावमादा
य संयोगादिसंबंधेन साध्यतायां तद्रव्याद्यभावमादायातिव्याप्तिपरतयैव तत्संगतेरित्याहुः।
तन्मंदं। वनोन्यत्वाद्यभावस्येत्यादिग्रंथविरोधात्। भूतत्वमूर्त्तत्वोभयस्य समवायेन साध्यता
यां मनोन्यत्वस्य तत्संबंधेन साध्यव्यापकत्वासंभवात्। वृत्त्यनियामकसंबंधेनाधिकरणत्व
स्य प्रतियोगित्वस्य चाप्रसिध्या तेन संबंधेन साध्यतायां धतीचैत्रत्वादित्यादिसंगतौ अव्याप्त्या
पत्तेः। तद्रूपान्यरूपं रूपत्वादित्यादावतिव्याप्त्यापत्तेश्च साध्यताघटकसमवायसंबंधेन साध्य
व्यापकतावच्छेदकप्रतियोगिताकानां व्यधिकरणधर्मावच्छिन्नगुणत्वाद्यभावानां सत्वेषामेव
स्वविशिष्टहेत्वधिकरण्यावच्छेदेन प्रतियोगिसामानाधिकरण्यादिति। परंतु विशेषणताविशेष
णा साध्यव्यापकत्वे तेनैव च प्रतियोगित्वप्रतियोगिसामानाधिकरण्यं च संबंधैक्यविवक्षये

३०

त्यस्यार्थमाहुः। तदपि गत्वाद्यभावस्यात्मत्वाद्यभावस्येत्यादिग्रंथस्यालग्नत्वापत्ते रुपेक्षि
तमिति। तन्वेवमेतावतापि प्रमात्माज्ञानादित्यादावव्याप्तिरेव घटत्वादिनात्मत्वाभावस्या
पि स्वविशिष्टस्य हेतौ विषयतया अधिकरणे परादेर्व्यापकताघटकसमवायेन प्रतियोगिसा
मानाधिकरण्याभावादत आह दलांतरेपीति। पश्चादुक्तहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधि
करणदलेपीत्यर्थः। संबंधभेदनिबंधनो दोषः। एकसंबंधेन हेत्वधिकरणत्वं स्वविशिष्टहेत्व
धिकरणेत्यत्र अन्यसंबंधेन हेत्वधिकरणत्वानिबंधनो अव्याप्तिरूपो दोष इत्यर्थः। संबंधैक्य
विवक्षयेति हेतुसमानाधिकरण्यादित्यत्र हेत्वाधिकरणत्वं येन संबंधेन स्वविशिष्टहेत्वधिकर
णावच्छेदेनेत्यत्र हेत्वधिकरणत्वं तेनैव संबंधेन विवक्षयेत्यर्थः। इत्थं च दलांतरेपीति साधुसं
गच्छत इति नव्याः। यद्वा धूमवान् वन्हेरित्यादावतिव्याप्तिः। धूमसामान्याभावस्यापि हेत्व
धिकरणावच्छेदेन स्वप्रतियोगित्वस्य कालिकादिसंबंधेन आम्रईभूतवन्ह्यादिसामाना

धिकरण्यादत आह दलांतरेपीति। प्रतियोगिसामानाधिकरण्यकरित्यत्र प्रतियोगिता
श्रयदलेपीत्यर्थः। संबंधभेदनिबंधनो दोषः। प्रकृतसाध्यव्यापकत्वस्य एकसंबंधावच्छि
न्नावच्छेदकप्रतियोगिताकाभावस्यान्यसंबंधावच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादि
सामानाधिकरण्यनिबंधनो दोषः संबंधैक्यविवक्षया यत्संबंधेन व्यापकतावच्छेदकत्वे
प्रतियोगित्वस्य सामानाधिकरण्यमित्यत्रापि तेन संबंधेन प्रातियोगिताश्रयत्वविवक्ष
याइत्यर्थ इति संक्षेपः। अत्र संबंधैक्याविवक्षायां रूपसामान्याभाववान् पृथिवीत्वाज्जन्य
पृथिवीत्वाद्वेत्यादिविरुद्धहेतावतिव्याप्तिः। साधनसमानाधिकरणस्य पृथिव्यन्यत्वा
द्यभावस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन जन्यपृथिव्यवच्छेदेन वारिक्त विशेषणतया
प्रतियोगिसमानाधिकरणत्वात्। मूर्तमात्रस्यैव दिगुपाधित्वापगमात्। न चैवं तस्या ३१
लक्षत्वेतीदपमित्याकारकया। किंचित्समाव्यक्तेः विषयतासंबंधेन साध्यव्यापकत्वा

यावदंतर्गतस्य तदभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहा
न्नातिव्याप्तिः। तादृशबुद्धिव्यक्तेर्भिन्नकालीनघटादौ केनापि संबंधेन असत्वादिति वाच्यं
विषयतायाः ज्ञानसमानकालत्वनियमात् तादृशबुद्ध्यभावदशायामेव रूपशून्ये गगनादौ वि
षयतासंबंधेन तद्बुद्ध्यभावप्रतियोगित्वावच्छिन्नाभावसत्वात् तादृशज्ञानव्यक्त्यभावस्य सा
ध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्। स्वावच्छिन्नानधिकरण। साध्यवन्निष्ठ
त्वादिव्यापकतायास्तद्बुद्धिव्यक्तौ सत्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य
तद्बुद्धिव्यक्तावसत्वेन उक्तस्थले ऽतिव्याप्तेरावश्यकत्वादिति भ्रमं निराकुरुते रूपसामान्या
भाववत्यादिना पृथिवीत्वादिकमिति। नित्यपृथिव्याः दिगुपाधित्वे मानाभावादाह दिपदं। ते
न जन्यपृथिवीत्वाद्युपग्रहः। सद्धेतुप्रतिकूलं विरोधं निरस्यति। प्रलय इति महाप्रलय
इत्यर्थः। खंडप्रलये तु पार्थिवपरमाणो रूपमस्त्येव। अन्यथा उत्तरसर्गे पार्थिवद्व्यणु

कस्य रूपोत्पत्यर्थं परमाणोः पाकांतरकल्पनापत्तेरिति प्राचः। प्रलय इत्यस्य पाकेन रूपादेः
प्रलयदशायामित्यर्थः। तेन मता प्रलयानभ्युपगमेपि न क्षतिः उत्पत्तिकाले चेत्यत्र चकारे
ण निरुक्तप्रलयस्यानुकर्षणाद् एवं पाविन्यायेपि पाकदशायात्। सतयान ग्रंथन्यूनतेत्यपरे।
ननु विरोधविरहेपि घटाद्यवच्छेदेन व्यभिचारित्वात्कुतः सद्धेतुत्वमत आह उत्पत्तीति। य
द्यपि पाकेन श्यामादिरूपनाशकालेपि अवयविनि रूपसामान्याभावसत्त्वं तथापि पि
लुपाकवादिमते तदभावात्। अपच्यमानावयव्यनुरोधाच्च उत्पत्तिकालमात्रानुसरणं
तत्सत्त्वादिति। रूपादिसामान्याभावसत्त्वादित्यर्थः। विरोधित्वं एकदा एकदेशावृत्तित्वं
मानाभावादिति। प्रलयाद्यवच्छेदेन प्रामाण्यादौ रूपादिसामान्याभावे तु योग्यसंनि
कर्षाभावात्। प्रत्यक्षासंभवेप्यनुमानादिकमेव मानमस्तीत्याशयः। यत्तु घटादेरुत्पत्ति
कालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव संभवति। तदानीं चक्षुःसंयुक्तविशे

षणतायाः तत्रासत्त्वेपि द्रव्यसमवेतवृत्त्यभावप्रत्यक्षहेतोः चक्षुःसंयुक्तसमवेतविशेषण
तामात्रसत्त्वेन संनिकर्षसंभवादिति। तत्तुच्छं। चक्षुःसंयुक्तसमवेतद्व्यणुकविशेषणतया रू
पाद्यभावचाक्षुषापत्त्या चक्षुःसंयुक्तयोग्यसमवेतविशेषणताया एवाभावग्राहकत्वेन द्र
व्यान्यद्रव्यसमवेतवृत्त्यभावचाक्षुषस्यापि तत्र अन्यतावच्छेदकत्वात्। अन्यथात्र सरेणुवृत्त्य
भावचाक्षुषव्यभिचारापत्तेः। वस्तुतः स्वान्यतेपूर्वं चक्षुःसंयुक्तसमवेतस्य घटादेरसत्त्वात्तद्वि
शेषणताया अपि तदानीमसत्त्वात् उक्तक्रमेण हेतुतेवाति वजितिध्येयम् अत एवेति। ध्वं
सप्रागभावयोरत्यंताभावविरोधित्वे मानाभावादित्यर्थः। ध्वंसप्रागभावयो
स्सत्त्वमावेदयितुमंतरा पदं। रक्तं रूपमिति। न च गुणेभ्यः शुक्लादयः पुंसीत्यनुशासनात् न
रक्तो रूपं नास्तीत्यस्य वप्रयोगायुक्त इति वाच्यं। वस्त्वेतपविशेषणभावापन्नस्यैव शुक्ला
दिशब्दस्य पुंस्त्वानुशासनात्। अत एव शुक्लं रूपमिति प्रयोगः समासे माधिकृतैव वस्य

तद्इतिध्येयम्। एषः रक्तरूपंनास्तीत्याकारकप्रत्ययः। पूर्वत्यादि। पूर्वरक्तस्यध्वंसवत्तत्तदुत्तररक्तस्यप्रागभ
वतिइदानींरक्तेपीत्यर्थः। नचरक्ततादृशाभावं वर्तमानस्यापिरक्तांतरध्वंसादेस्तदानींरक्तत्वावच्छिन्नप्रति
योगिताकत्वविरहान्नतादृशप्रत्ययः। तस्यभ्रमव्याप्यरक्तेचादितिवाच्यं। ध्वंसादिप्रतियोगित्वस्यसा
मान्यधर्मानवच्छेद्यत्वात्। तत्तद्रक्तध्वंसप्रागभावादिषुरक्तत्वाद्यवच्छिन्नप्रतियोगिताकत्वकल्पना
मपेक्ष्यरक्तत्वावच्छिन्नात्यंताभावसंबंधस्यैवांतराश्यामादिषुकल्पनायाः लघुत्वाच्च। नचयावंतिरक्त
रूपाणितत्तद्व्यक्तित्वतदर्थमानवच्छिन्नत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावेरेवरक्तंरूपंनास्तीतिप्रत्ययः
क्रियतेप्रकृते। चविद्यमानरूपप्रतियोगिकस्यतादृशाभावस्यासत्वान्नतथाप्रतीतिरितिवाच्यं। तथा
सत्यंतराश्यामेरक्तंरूपंनास्तीत्याकारकनिर्णयेपितत्ररक्तंरूपमस्तीतिप्रत्ययापत्तेः। विरोधिनस्सा
मान्याभावस्यानिश्चयात्। विशेषाभावकूटनिर्णयस्याप्रतिबंधकत्वात्। अन्यथासामान्याभावए
वनसिद्ध्येदितिभावः। सांबस्तुप्रतियोगितासंबंधेनरूपत्वमात्रावच्छिन्नप्रकारताकः संसर्गाभाव

३३

विशेष्यकः प्रत्ययोरूपत्वावच्छिन्नाभ्रमवच्चरूपंनास्तीतिप्रकारताकबुद्धेर्विरोधीतिरूपत्वंप्रतियो
गितावच्छेदकमेवनेतिश्यामतादृशायांरूपत्वावच्छिन्नाभावएवरूपंनास्तीतिप्रतीतेर्नविषयःकिम
नुरोधेनरूपध्वंसादिमतितदत्यंताभावसिद्धिरित्याहुः। अत्रांतराश्यामेसमवायेनरक्तंरूपंनास्तीति
प्रतीतेः प्रामाण्यानुरोधाद्द्वध्वंसात्यंताभावयोर्नविरोधः। अन्यथासमवायावच्छिन्नप्रतियोगिता
कध्वंसाप्रसिद्ध्यातत्प्रतीतिर्भ्रमत्वापत्तेरितितुपरमार्थः। तत्सामानाधिकरण्यंचेति। प्रतियोगि
सामानाधिकरण्यंचेत्यर्थः। स्वविशिष्टेति। स्वपदंसाध्यव्यापकतावच्छेदप्रतियोगिताकतत्तद्भा
वव्यक्तिपरं। तथाचतत्तदभावाश्रयीभूतयद्धेतुताघटकसंबंधेनयद्धर्मावच्छिन्नाधिकरणे। तद्वच्छे
देनतत्तदभावस्वस्वप्रतियोगिसामानाधिकरण्यंग्राह्यमित्यर्थः। तेनहेतुसमानाधिकरणस्य
घटत्वादिनावह्न्याद्यभावस्यकालिकसंबंधेनधूमाद्यधिकरणास्यंदादौव्यापकताघटकसंयो
गादिसंबंधेनप्रतियोगिसामानाधिकरण्याभावेपिवह्निमान्धूमादित्यादौनाव्याप्तिः। नवा

द्रव्यं विशिष्टसत्त्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणगुणाद्यवच्छेदेन प्रतियोग्य
समानाधिकरणत्वेपि क्षतिः। गुणादीनां विशिष्टसत्तानधिकरणत्वात्। यद्यपि व्याप्यवृत्तेरवच्छेद
केमानाभावाद्द्रव्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यं तदवच्छेदकत्वेन हेत्वधिकर
णस्येत्यसंभवः। कथितातिव्याप्तितादवस्थ्यं च। न च स्वविशिष्टहेत्वधिकरणता व्यापकीभूतप्रति
योग्यधिकरणतावृत्तित्वं वाच्यं। स्वविशिष्टपदवैयर्थ्यापत्तेः। प्रतियोग्यधिकरणीभूतस्वविशि
ष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ च द्रव्यं तद्घटत्वादित्यादावव्याप्तिः यावद्धेत्वधिकरणाप्रसिद्धेः।
तथापि यावत्तो हेतुमद्वृत्तिधर्मा हि त्वधिकरणता निवायां वर्तितत्प्रत्येकाश्रयीभूतप्रतियोग्यधिकरण
त्वस्य विवक्षितत्वाद्दोषः। एकमात्रवृत्तिहेतोरपि तत्तत्क्षणवृत्तिविशिष्टस्याधिकरणत्वस्य नानात्वसं
भवतीति न तत्राव्याप्तिः। न च प्रतियोग्यधिकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणाकत्वमात्रे सम्यक्।
हेतुसमानाधिकरणाद्वृत्त्यस्य स्वविशिष्टत्वस्य चवैयर्थ्यापत्तेः। प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकर

३४

णावच्छेदेनेत्यस्य प्रवेशाएवअर्थवद्भवतीत्यतेः पश्चादुक्तस्यापि तस्य प्रथमं प्रयोजनमाह तेनेति। गो
त्वादिना गवाद्यभावस्य तद्वृत्तिकालेवृत्तावपि यदा गोत्वं तदा गौरित्यादौ नातिप्रसंग इति योजना। इ
दमुपलक्षणं। तत्र द्रयोगोलकान्यत्वाद्यभावस्यापि काले प्रतियोगिसमानाधिकरणत्वात् धूमवा
न्वह्नेरित्यादावतिप्रसंगो द्रष्टव्यः। गवाद्यभावस्य काले प्रतियोग्यधिकरणे दैशिकसंबंधेनापि
वृत्तित्वमुपपादयितुमाह गवाद्यनधिकरणेति। इदानीं च त्वरे गौर्नास्तीति प्रत्ययाद्व्योमत्यपि काले
कालिकसंबंधावच्छिन्नगवाद्यभावस्य गवानधिकरणात्रत्वरावच्छेदेन वृत्तौ न विरोधः। न चैतत्प्रत्यय
स्य चत्वर एव एतत्कालावच्छेदेन गवात्यंताभावो विषय इति वाच्यं। देशवृत्तौ कालस्येव कालवृत्तौ देश
स्यावच्छेदकत्वानुभवादेकशेषस्य कर्तुमशक्यत्वात्। इदानीं गगने गौर्नास्तीति प्रतीतेर्गवाद्यभा
वस्य एतत्कालावच्छेदेन गगनवृत्तित्वावगाहितायां भ्रमत्वापत्तेश्च गवाद्यभावस्य गगनादौ सा
र्वदिकत्वेन व्याप्यवृत्तितया कालावच्छेद्यत्वासंभवात्। तद्वृत्तीति। गवादिमसीत्यर्थः। काले नन्य

काले। ननु चरमध्वंसात्मकस्य प्रलयात्यंताभावाभावस्यापि यावद्वर्तनगतित्वात्तस्य च स्वसृष्टिकाले प्रति
योगिसमानाधिकरण्याभावान्नातिव्याप्तिरत आह महाकाले वेति। तथा च तस्यापि महाकाले प्रति
योगिसामानाधिकरण्यं तस्य कालिकसंबंधेन जगदाधारत्वादिति भावः। ननु गोत्वादिमतः प्रलये का
लिकसंबंधेन सत्त्वे प्रमाणाभावाद्घटरागो वेतद्रागो रितिसद्धेतुरेवेति यदि ब्रूयात्तदाप्याह॥ यत्र कालत्व
मिति। उक्तविवक्षानादरे घटादिसाधारणरूपेणापि गोस्साध्यतायामतिव्याप्तिरित्याशयेन सा
ध्यांतरमाह। जन्यद्रव्यमिति। द्रव्यत्वेन द्रव्यस्य साध्यतायां कालत्वं सद्धेतुरेव प्रलयेपि कालिकसंबंधे
न परमाण्वादेः सत्त्वात्। कार्यद्रव्यानधिकरणत्वे सति द्रव्यवत्त्वेनैव धर्मिग्राहकप्रमाणेन तत्सिद्धेरता
व्यभिचारित्वसंपत्तये जन्यपदं। ननु महाप्रलयानंगीकारे प्रागुक्तहेतुद्वयं लक्ष्यमेव। खंडप्रलये त्वब्रह्मा
ण्डांतरे जन्यद्रव्यसत्त्वादतः साध्यांतरमाह प्रलयावृत्तिर्वेति। खंडप्रलयावृत्तिर्वेत्यर्थः। यद्यपि प्रतियोगि
नो यदधिकरणं तद्वृत्तित्वस्य दैशिकविशेषणतासंबंधेन विवक्षायामपि यद्रागो नेतद्रागो रित्यादा

३५

वतिव्याप्तिवारणं संभवति प्रलयावृत्तित्वाद्यवच्छिन्नाभावस्य स्वप्रतियोग्यधिकरणे महाकाला
दौ दैशिकसंबंधेन वृत्तित्वविरहात्। न च द्रव्यं महाकालत्वादित्यादावव्याप्तिः। कालिकसंबंधेन
महाकालनिष्ठस्य द्रव्यत्वाद्यभावस्य स्वप्रतियोग्यधिकरणे दैशिकविशेषणतया वृत्त्यभावादि
ति वाच्यं। हेतुसमानाधिकरणत्वस्यापि तादृशविशेषणतया विशेषणीयत्वात्। तथापि रूप
भिन्नं गुणत्वादित्यादौ साधनसमानाधिकरणस्य रूपान्यत्वाद्यभावस्य रूपभिन्नत्वप्रकार
कप्रमाविशेष्यत्वाद्यभावस्य च रूपत्वादित्वरूपतया तस्य दैशिकविशेषणतया वृत्तित्व
विरहेण यावद्वर्तनंतर्गतत्वात्। घटत्वादिना रूपभिन्नत्वाद्यभावस्य च सर्वस्यैव तादृशाभावस्य
महाकालादौ स्वप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिरतः स्वविशिष्टहेत्वधिकरणत्वा
दिविवक्षानुसरणमिति वदंति॥ वस्तुतो दैशिकविशेषणताघटितस्य लक्षणांतरत्वादेकेना
परस्यान्यथाकर्तुमशक्यत्वादुक्तलक्षणे नैवयर्थ्यमिति ध्येयं। यत्तु हेत्वधिकरणे विशेषण

तयावर्तमानानां निरुक्तयावदभावानां प्रतियोगिवृत्तित्वमेव विशेषणताविशेषसंबंधेन
निवेशनीयं। प्रतियोग्यधिकरणावृत्तित्वप्रवेशे गौरवात्। सर्वत्रव्यभिचारिस्थलान्यत्वाद्यभा
वमादायातिव्याप्त्यभावादिति। तन्तुच्छं। स्ववृत्तित्वविशिष्टानां केवलान्वयिधर्माणां अत्यं
ताभावस्य स्वप्रतियोग्यवृत्तित्वेन असंभवापत्तेः। नहि वाच्यत्वादिवृत्तित्वविशिष्टानां वाच्यत्वा
दीनामभावो वाच्यत्वादिरूपप्रतियोगिवृत्तिरिति दिक्। प्राचीनमते संयोगसामान्याभावसाध्यके
प्रमेयत्वं द्रव्यएव व्यभिचारीत्यतः कृपिपदं। प्रतियोगिवैय्यधिकरण्यघटितमेव साध्यव्या
पकत्वमत्रप्रवेशितं यथासन्निवेशे वैयर्थ्यविरहादतः तदनवच्छेदकत्वं संयोगाभावनिष्ठप्रति
योगित्वेप्यक्षतमित्याशयेन संयोगात्मकाभावस्याभिधानं तद्घटितसाध्यव्यापकतायाः
प्रवेशे तु गगनत्वादिविशिष्टस्य गगनाद्यभावस्याभावो पिष्टावदंतर्गत इति तस्यैव हेत्वधि
करणीभूतगगनावच्छेदेन प्रतियोग्यसामानाधिकरण्यात्वाद्व्याप्तिरतः स्वविशिष्टपदं। ए २६

तदभिप्रायेणैव संयोगात्मकाभावेत्यत्रादिपदमुपात्तं। वस्तुतस्सत्तावान्द्रव्यत्वात् गुणत्व
वान् रूपत्वादित्यादौ कालेजन्यरूपेव हेतुसमानाधिकरणासत्ताद्यभावस्य गुणत्वसामान्या
भावस्य च केनापिसंबंधेन आत्मगगनादौ नित्यरूपे च अवृत्तित्वात् उत्वाधिकरणावच्छेदेन त
स्यैव यावदंतर्गतस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिस्यादाद्यदिस्वविशिष्टपदं न
स्यादितिदिक्। ननुधूमाद्यभावनिष्ठजलादिवृत्तित्वविशिष्टस्य गोत्वाद्यभावस्याभावो धूमा
द्यभावएव अभावप्रतियोगिकस्याभावाधिकरणकाभावस्याधिकरणास्वरूपत्वात्। त
था च धूमादौ साध्ये वन्ह्यादिहेतावतिव्याप्तिः। धूमाद्यभावस्य हेत्वधिकरणावच्छेदेनैव गोत्वा
द्यभावरूपप्रतियोगिसमानाधिकरण्यात्वादतः आह जलादिवृत्तीति। न च तादृशाभावस्य धूमा
भावस्वरूपत्वेपि जलादेन तादृशाभावावच्छिन्नाधिकरणत्वं किंतु धूमाभावत्वावच्छिन्ना
धिकरणत्वमेवेति न प्रत्ययातिप्रसंग इति वाच्यं। एवमभावमात्रस्यैवाप्रायेणाभेदप्रसंगा

दुक्तक्रमेणैव अतिप्रसंगस्य वारणसंभवादिति भावः। ननु तथापि धूमवान्वह्नेरित्यादावति
व्याप्तिः। समनियतभावानामैक्याधूमाभावस्य वह्निधूमोभयाभावादभिन्नस्यायोगोल
कान्यतराद्यभावादभिन्नस्य अयोगोलकभेदत्वादिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणा
वच्छेदेनैव वन्ह्यात्मकप्रतियोगिसमानाधिकरणत्वादिति चेदत्राहुः। यावत्पदस्य फलतः प्रति
योगिताविशेषणत्वेन साध्यव्यापकतावच्छेदकीभूतयद्धर्मप्रतियोगिताकोऽभावः। तस्य स्ववि
शिष्टहेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षितं। तथा च धूमा
दिसामान्याभावस्य धूमनिष्ठतादृशप्रतियोगिताकस्य धूमादिनिष्ठप्रतियोगिताश्रयेण धूमा
दिना हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिव्याप्तिः। न चैवं यत्समानाधिक
रणान्त्यस्य वैयर्थ्यमिति वाच्यं। आत्मत्वसामान्याभावीयप्रतियोगितायामपि साध्यव्यापक ३८
तावच्छेदकतया तत्प्रतियोगिताकस्यात्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसा

मानाधिकरण्यविरहादियमात्मान्नानादित्यादावव्याप्तिवारकत्वाज्जलवृत्तित्वविशिष्टत्वादि
ग्रंथस्वरसतोऽवगतिमनुरुध्येवोक्तं। तेन तादृशाभावस्य धूमाभावस्वरूपत्वेपि तस्य हेत्वधिकरणा
वच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्य
विरहादेव अतिव्याप्त्यसंभवेपि नासंगतिः। न च धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियो
गित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामान्यनिष्ठं प्रतियोगित्वं लाघवात्। न
नु तद्भिन्नप्रतियोगित्वं गौरवादित्यविवक्षयाप्यप्रतिकार इति वाच्यं। स्वरूपसंबंधात्मिकायाः
प्रतियोगितायाः सामान्याभावस्थलेपि प्रतियोगिभेदेन भिन्नत्वादिति सांप्रदायिकाः॥ वस्तु
तस्साध्यव्यापकतावच्छेदिकायास्त्वभ्यूनवृत्तिधर्मानवच्छिन्नायाः यादृशप्रतियोगितायाः
निरूपकोऽभावः तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधि
करण्यमेव वक्तव्यं। तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावानति

दिक्त्वेपि च तदीयं प्रमेयसामान्यनिष्ठं यत्प्रतियोगित्वं स्वन्यूनवृत्ति नैव धूमत्वादिधर्मेणाव
च्छिन्नमतो न तादृशप्रतियोगिताश्रयस्य सामानाधिकरण्यामुपादायातिप्रसंग इत्युक्त
मुत्पश्यामः ॥ यत्तु समनियताभावानामैक्यमते धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं
येन येन संबंधेन साध्यव्यापकता तैः प्रत्येकं प्रतियोगिसामानाधिकरण्यं विवक्षितं। तथाच
व्यभिचारिमात्रएव यत्र अधिकरणे व्यभिचारस्तत्रान्यत्वस्य स्वात्मकस्वरूपसंबंधेन साध्य
व्यापकत्वात्तदभावस्य वह्नेस्त्वधिकरणावच्छेदेन तादृशान्यत्वस्वरूपस्वरूपसंबंधेनापि स्वप्रति
योगिसामानाधिकरण्याभावान्नातिव्याप्तिः ॥ अतएव विषयितासंबंधस्य व्यापकताघटक
त्वेपि नित्यज्ञाने नित्यसविषयकत्वादित्यादौ नातिव्याप्तिः। नित्यज्ञानत्वाद्यभावस्य व्यापक
ताघटकीभूतेन समवायसंबंधेनैव प्रतियोग्यसामानाधिकरण्यात्वादितिमतं ॥ तत्तुच्छं। घट
त्वादिनावाच्यत्वाद्यभावस्यैव घटत्वादिनाऽयःपिंडान्यत्वाभावस्वरूपतया तस्य च व्यापक

३८

ताघटकेन अयःपिंडान्यत्वनिरूपितस्वरूपसंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसामाना
धिकरण्यविरहादेव धूमवान्वह्नेरित्यादावतिव्याप्तिविरहात्। यावंतः इत्यस्य स्वविशिष्टत्वस्य प
त्समानाधिकरणा इत्यस्य च वैयर्थ्यतापातादितिदिक् ॥ ॥ ननु व्यधिकरणधर्मावच्छिन्नाभा
वासत्वेपि सर्वत्र सद्धेतौ गगनत्ववाच्यत्वोभयाद्यभाव गगनत्वादिविशिष्टस्य वाच्यत्वस्या
भाववा समादाव प्रोक्तलक्षणासंभवात्। प्रतियोग्यवृत्तिश्चेत्यादिमूलावतारानुपपत्तिः। नच
वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगितायाः विशेषणी
यत्वान्नैवमिति वाच्यं। व्यभिचारावारकत्वेन तादृशविशेषणस्य व्यर्थत्वात्। अन्यथा व्यधिकर
णधर्मावच्छिन्नाभावकालीनत्वेन हेतुविशेष्यैव ग्रंथावतरणं कुतो न समर्थयेरतो लक्षणांत
रमाह। यत्समानाधिकरणानामित्यादि। वह्निमान्धूमात् सत्तावान्द्रव्यत्वादित्यादाव व्याप्तिः
साध्यव्यापकप्रतियोगिताकानां जलवृत्तित्वविशिष्टद्रव्यत्वाभावगुणवृत्तित्वविशिष्टस

ताद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकीभूत जलवृत्तित्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्याभावादेतदंशे व्यापकतावच्छेदकरूपावच्छिन्नेति। तथाच जलवृत्तित्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकतानवच्छेदकत्वाद्दोषः॥ यत्तु साध्यव्यापकप्रतियोगिकस्य घटत्वेन वह्न्यभावस्य यावद्धेत्वधिकरणे घटत्वाद्यवच्छिन्नसामानाधिकरण्याभावाद्व्यापकतावच्छेदकरूपावच्छिन्नेति। न इत्यंतमसत्। घटत्वेन वह्न्यभावस्य वह्नित्वेन घटाद्यभाववत्तया तस्यापि यावद्धेतुमन्निष्ठप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात्। समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात् तदवच्छिन्नवाच्यत्वाभावस्य मूलोक्तस्य तल्लक्षणाघटकत्वाद्धेत्वयत्वादिनेति। शेषमित्यादि। येन संबंधेन हेतुस्तेन संबंधेन हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावे ग्राह्यं। तेन अयमात्मा ज्ञानाद्घटान्यत्वे सत्यात्मघटसंयोगा

३७

घेत्यादावात्मत्वसामान्याभावस्यात्मन्यपि नाव्याप्तिः एवं येन संबंधेन व्यापकता तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्य स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं। अतो न अधिकरणधर्मावच्छिन्नाभावस्यासत्वेपि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणासमन्वयसंभवात्प्रतियोन्यवृतीत्यादिग्रंथावतारानुपपत्तिः। नवा जलत्वादेस्समवायेन साध्यतायां महाकालत्वाद्यावर्तितिव्याप्तिः। प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं। तेन द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य कालेहेतुमति प्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिः इदत्वव्धयम्। व्याप्ताध्ववन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरूपमेव व्यापकतावच्छेदकत्वमत्र लक्षणे प्रवेश्यं। नतु प्रतियोगिव्यधिकरण्यघटितं। तथासति व्यधिकरणधर्मावच्छिन्नाभावासत्वेपि सर्वं प्रमेयमित्याकारकजन्ययत्किंचिद्

ष्ठविषयत्वसामान्याभावमादायैवसर्वत्रलक्षणसंभवेप्रतियोग्यवृत्तित्वेत्यादिग्रंथावतारा
नुपपत्तेः। तज्ज्ञानव्यक्तिविषयत्वस्यतादृशज्ञानदशायामेवसत्वेनतदसत्वदशायामेवता
दृशज्ञानविषयत्वाभावस्यहेतुसमानाधिकरणत्वात्। एवंचात्रस्वविशिष्टपदेनकपिसंयो
गाद्यात्मकाभावंगगनत्वादिविशिष्टस्यवाच्यत्वस्याभावमादायकपिसंयोगाभाववान्मे
यत्वादित्यादावव्याप्तिवारकेकपिसंयोगाभावत्वादेरुक्तव्यापकतावच्छेदकत्वाभावात्॥
किंतुहेतुमतिकालेवर्तमानस्यसत्वसामान्याभावस्यापिनिरुक्तरूपशालित्वात्। तस्य
चात्मादावसत्वेनयावत्केवलाधिकरणप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्य
विरहात्सत्तावान्द्रव्यत्वादित्यादावव्याप्तिवारकमेवस्वविशिष्टपदं। नचसाध्यतावच्छेद
कावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावीयहेत्वधिकरणावच्छेदे
नस्वावच्छेदकसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वमित्येव

सम्यक्त्ववाच्यत्वत्वादिनाघटाद्यभावस्यादायवाच्यंज्ञेयत्वादित्यादौलक्षणसंभवादि
तिवाच्यं। स्वरूपसंबंधेनप्रमेयत्वावच्छिन्नाभावाप्रसिद्ध्याप्रमेयवान्ज्ञेयत्वादित्यादावप्र
व्याप्तेः गुरुधर्मावच्छिन्नप्रतियोगिताप्रसिद्ध्याप्रमेयवन्हिमान्धूमादित्यादावव्याप्तेः।
वृत्त्यनियामकसंबंधस्यप्रतियोगितानवच्छेदकतयागोमान्चैत्रत्वादित्यादौस्वामित्वा
दिसंबंधेनगवादेस्साध्यतायामव्याप्तिश्चेतिदिक्। ननुवन्हित्वेनधूमत्वेनचसामान्या
भावोधूलीयसंयोगसंबंधेनद्रव्यसामान्याभावोवाधूमाभावएव। तथाअयोगोलकभे
दतदभावान्यतरत्वेनअयोगोलकावृत्तेरभावोअयोगोलकान्यतीयस्वरूपसंबंधेनभेद
सामान्याभावोवाअयोगोलकान्यत्वाभावएवसमतियत्ताभावानामैक्यात्। तथाचधूमा
द्यभावस्यप्रतियोगितावच्छेदकपदान्हित्वादिकंतदवच्छिन्नेनवसमयावृत्त्वधिकरणो धू
माद्यंचभावस्यसमानाधिकरणत्वात्। धूमवान्वन्हेरित्यादावतिव्याप्तिः। सामान्यधर्म

णाविशेषाभावाभ्युपगमे तु सुतरां तथा। धूमत्वेन धूमाद्यभावानामेव प्रमेयत्वादिना धूमाद्य
भावतया तस्य च स्वप्रतियोगितावच्छेदकीभूतप्रमेयत्वाद्यवच्छिन्नसमानाधिकरणत्वादिति च
न। अत्रापि याववत्त्वस्य फलतः प्रतियोगिताविशेषणतया साध्यव्यापकतावच्छेदकरूपावच्छि
न्नयद्यत्प्रतियोगिताकोयत्समानाधिकरणाभावः स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्प्रति
योगितावच्छेदकावच्छिन्नसमानाधिकरणत्वमिति पर्यवसितार्थः। तथा च धूमादिनिष्ठ
तादृशधूमत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य धूमादिनिष्ठप्रतियोगित्वं तदवच्छेदकी
भूतधूमत्वाद्यवच्छिन्नेनैव सार्द्धं हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिप्रसं
ग इति संप्रदायविदः। वस्तुतो यत्राग्निसाध्यव्यापकतावच्छेदकरूपावच्छिन्नयान्यूनवृत्तिध
र्मानवच्छिन्नयायादृशप्रतियोगितया निरूपको अभावस्तादृशप्रतियोगितायायदवच्छेद
कं तदवच्छिन्नसामानाधिकरण्यं वक्तव्यं धूमत्वादिना धूमाद्यभावस्तु न प्रमेयत्वादिना धू

४१

माद्यभावस्तु न प्रमेयत्वादिना धूमाद्यभावः सामान्यधर्मेणाविशेषाभावस्यानभ्युपगमात्तत्
दभ्युपगमे तु यादृशप्रतियोगिताकाभावे यादृशप्रतियोगितावच्छेदकावच्छिन्नवृत्तित्वस्य ज
गद्वृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगि
ताकाभावानां तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यमतो न कश्चि
द्दोष इति ध्येयम्॥ ॥चक्रवर्तिलक्षणान्याह केचित्त्विति। अनवच्छेदकमिति। यत्साध्यतावच्छे
दकमिति परेणान्वितं। घटत्वादिना वह्न्यभावमादाय वह्निमान् धूमादित्यादौ लक्षणासंग
तिः। व्यभिचारिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगिताव
च्छेदकं साध्यतावच्छेदकं अतो नातिव्याप्तिः। कपिसंयोगी एतत्त्वादित्यादावव्याप्तिवारणाय
व्याप्यवृत्तेरिति। वह्नित्वादिना घटादेरभावमादायाव्याप्तिरतः साध्येति। अत्रत्वप्रतियोगि
तासाध्यतावच्छेदकसंबंधेन ग्राह्या। तेन समवायसंबंधेन वह्न्याद्यभावस्य हेतुसमाना

धिकरणस्य प्रतियोगितावच्छेदकत्वे पि वह्नित्वादेर्नासंभवः। प्रतियोगिवैयधिकरण्यस्य प्रवेशो
वाच्यं इति पक्षादित्यादावव्याप्तिः। प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेः तस्य परित्यागः।
व्याप्यवृत्तित्वं तु निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वे हेत्वधिकरणवृत्ति किंचिद्व्यक्तिनिष्ठाभावप्रतियो
गितायास्सामान्यानाधिकरण्येनानवच्छेदकं पदभावव्याप्तित्वेन त्वं वा। एवं चेत्तल्लाभार्थमेव
हेतुसमानाधिकरणस्येत्युक्तं। ननु स्वातंत्र्येण विशेषणं व्यर्थं स्यात्। यत्किंचित्त्वनिवेशात्त्व
संयोगाभावत्वस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि संयोगी
सत्वादित्यादौ नातिव्याप्तिः। ननु समनियताभावानामैक्यमते घटत्वेन वह्न्यभावस्य वह्नि
त्वेन घटाभावतयाहेतुसमानाधिकरणस्य तादृशस्य वसाध्याभावस्य प्रतियोगितावच्छेदक
वह्नित्वादिकमित्यव्याप्तिरतः समनियताभावानामैक्यमतेपि निष्कृतिमाह। हेतुसमानाधि ४२
करणस्येति। व्याप्यवृत्तेरभावस्य प्रतियोगितायास्सामानाधिकरण्येनानवच्छेदकपक्षा

ध्यतावच्छेदकमितियोजना। नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्निधूमोभयाभाव
स्य प्रतियोगितायास्समानाधिकरण्येसत्त्वे वह्नित्वस्यावच्छेदकमित्यव्याप्तिः। तादृशप्रतियोगि
तायाः अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वाकांक्षा वपि तथा व्याप्तिः एवं तेन वह्नित्वेन तादृश्याता
दृशाभयंनास्तीति प्रतीतिसिद्धस्य तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्यान
वतादृशाभावप्रतियोगितावच्छेदकत्वेन वह्नित्वमात्रपर्याप्तं। किंतु तादृशतादृशोभयेपि।
अन्यथा तादृशाभावप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवति पर्वतादौ तादृशाभा
वासत्त्वप्रसंगादिति वाच्यं सोऽयं समते प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वमात्रस्याभाव
विरोधित्वात्। अन्यथा पटवति पटत्वेन घटाभावस्यापलापापत्तेः। किंतु प्रतीतिबलात् व्यधि
करणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्मविशिष्ट
प्रतियोगितावच्छेदकावच्छिन्नेनैव सा इत्यनायत्या अभावस्य विरोधित्वं वाच्यं। तदेतद्वह्नि

त्वादिना तारणान्तरणोभयाभावादिसत्वेपि न क्षतिकरं। अत एव द्रव्यत्वेन वह्निर्नास्ति वह्नित्वे
न तद्वह्निर्नास्तीत्यादिप्रतीत्या सामान्यधर्मेणापि विशेषाभावोऽभ्युपपत्तेः। न च तत्र वह्नित्वस्य
व प्रतियोगितावच्छेदकत्वभासने द्रव्यत्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यं। वह्निमान् पर्वत इत्य
वनिर्णयसत्त्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्रत्ययात् द्रव्यत्वस्यैवावच्छेदकतया भानात्। अन्यथा
वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वप्रकारेण वह्न्यभावबुद्धौ वह्नित्वेन वह्निमत्ता
निश्चयस्यैव प्रतिबन्धकत्वात्। तादृशप्रतीत्यसंभवापत्तेः॥ अस्माकं तु द्रव्यत्वावच्छिन्नवह्नि
निष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति द्रव्यत्वेन वह्नित्वविशिष्टनिश्चयस्यैव विरोधिता
त्। न दृष्टत्वादेव तादृशाभावप्रतीतिसंभवात् एतल्लक्षणान्तरमाह प्रतियोगिव्यधिकरणस्य
वेति। केचित्तु सामानाधिकरण्यमभेदः। तथा च हेतुसमानाधिकरणाभावीयस्वाभिन्न
प्रतियोगितायाः अवच्छेदकपर्यन्तान्तरन्यत्वसाध्यतावच्छेदके विवक्षितं प्रतियोगित्वं हि

४२

स्वरूपसंबन्धविशेषः। स च सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूप एव। ननु प्रति
योगिस्वरूपः अननुगमात् आधाराधेयभावानुपपत्तेश्च। सामान्यधर्मेण विशेषाभावस्थ
ले च प्रतियोग्यंशे प्रकारीभूतो विशेषधर्म एव तथा न तु सामान्यधर्मः अतिप्रसक्तत्वात्।
व्यधिकरणधर्मावच्छिन्नाभावस्थले तु न प्रतियोगितावच्छेदकादिस्वरूपं प्रतियोगित्वं कि
न्त्वातिरिक्तमेव। अन्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनु वसाद्रूम भावस्य विरो
धात् तदवच्छिन्नवृत्तितादृशाभावस्यासत्त्वप्रसंगात्। विवादोऽप्यतिरिक्ताप्यं प्रतियोगिता
यामेव। अन्यथा समनियताभावानामैक्यनानि खिलव्यधिकरणधर्मावच्छिन्नाभावस्यैव
गगनाभावात्मकतया गगनाभावस्वीकर्तृणां चिन्तामणिकाराणां मतेनद्रनंगीकारानुप
पत्तेः इत्थं च पर्वते वह्नित्वेन ताराणान्तरणोभयं नास्तीति प्रतीतिबलात् तादृशाभावप्रति
योगितानवच्छेदकत्वस्य वह्नित्वे सत्त्वेपि तादृशप्रतियोगित्वं न वह्नित्वाभिन्नं किं तु तादृशोभ

यत्वाभिन्नमतिरिक्तमेववेति त्वाभिन्नायाः साधनवन्निष्ठाभावप्रतियोगितायाः यदवच्छे
दकं तदन्यत्वस्य वन्हित्वे सत्वान्न तस्य धूमव्यापकतावच्छेदकत्वहानिः। नन्वेवं लक्षणे हेत्वधि
करणवृत्तित्वं नाभावस्य संबंधमात्रेण वाच्यं। वन्हिसामान्याभावस्यापि कालिकसंबंधेन
धूमवत्तिसत्वादव्याप्त्यापत्तेः। नापि दैशिकविशेषणतासंबंधेन घटभिन्ने द्रव्यत्वादित्यादा
वतिव्याप्त्यापत्तेः। घटत्वस्वरूपस्य साध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहादित्य
तो लक्षणांतरमाह प्रतियोगिव्याधिकरणस्य वेति प्राहुः॥ केचित्तु प्रागुक्तव्याप्यवृत्तित्वम। किं
चित्वघटितत्वेन दुर्वचमतः प्रतियोगिव्यधिकरणस्य वेत्यादिलक्षणांतरं उक्तमित्याहुः॥ अन्ये
तु कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववे साध्ये आत्मत्वादिहेतावव्याप्तिः।
आकाशाभावात्मकस्य साध्याभावस्य निरवच्छिन्नवृत्तितया तत्प्रतियोगितावच्छेदकमेव सा
ध्यतावच्छेदकमतः प्रतियोगिव्यधिकरणस्य वेति लक्षणांतरमित्याहुः॥ हेतुसमानाधिक

५४

रणस्य प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितायाः सामानाधिकरण्येन तदवच्छेदकं यत्सा
ध्यतावच्छेदकं इति योजना। अथ अत्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधि
करणभिन्नत्वं समनियताभावानामैक्यतया घटत्वेन घटाभावादेरपि घटत्वेन प्रमेयसामा
न्याभावस्वरूपतया तस्य च प्रमेयात्मकप्रतियोगिसमानाधिकरणतया तदन्यत्वासंभवा
त्। अत एव स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणो यो यस्तदन्यत्वमपि न तथा
घटत्वेन घटाभावादेरपि प्रमेयत्वेन घटाभावस्य द्रव्यत्वेन घटावृत्तेरभावस्य तादृशस्योपग
मातु अप्रसिद्ध्यापत्तेः॥ व्यधिकरणधर्मावच्छिन्नाभावस्यापि तत एव वारणसंभवे अव्या
भिवारकसामानाधिकरण्येनेत्यस्य वैयर्थ्यापाताच्च। न च साध्यतावच्छेदकसंबंधेन या
दृशप्रतियोगिताश्रयानधिकरणहेत्वधिकरणतादृशप्रतियोगित्वं प्रतियोगितातायाः
तथा च वन्हित्वेन घटाद्यभावीयघटनिष्ठप्रतियोगि~~कस्याः सामानाधिकरण्य नावच्छेदके~~

त्वमपितादृशमतत्तादवच्छेदकत्वंवह्नित्वेप्यस्तीतिअसंभवोनःसामानाधिकरण्यपदं॥तेनता
दृशप्रतियोगितायाःसामानाधिकरण्येनावच्छेदकताप्रसिद्ध्यातद्भिन्नप्रतियोगित्वेलक्ष
णघटकेतिवाच्यंविशिष्टसत्तावान्जातेरित्यादावतिव्याप्तेः।गुणादीनामपिविशिष्टसत्तानि
ष्टप्रतियोगिताश्रयाधिकरणत्वात्घटवान्महाकालत्वादित्यादावव्याप्तिप्रसंगाच्च।हेतुमतो
महाकालस्यसाध्यताघटककालिकसंबंधेनघटाभावप्रतियोगिताश्रयाधिकरणत्वात्तथा
प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरितिचेत्।अत्राहुः॥साध्यतावच्छेदकसंबंधेनसावच्छेद
कधर्मावच्छिन्नाधिकरणतावच्छेदकत्वधिकरणिकायावत्यःप्रतियोगिताःतदन्यप्रतियोगित्वे
प्रतियोगितात्वार्थः।तथाचवह्नित्वेनघटाद्यभावस्यापिघटादिनिष्ठप्रतियोगितातादृशीति
तदवच्छेदकत्वंवह्नित्वेप्यस्तीत्यतःसामानाधिकरण्यपदं।घटवान्महाकालत्वादित्यादौतुगग
नाभावीयंगगननिष्ठमेवतादृशाभावप्रतियोगित्वंसुलभमितिनकोपिदोषः।वस्तुतोधूम

वानितिवह्नित्वेनघटोनास्तीतिवत्धूमवान्वह्नित्वेनघटवान्नकिंतुघटत्वेनेतिप्रतीतिबला
द्व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावोप्यस्तीति।अतएवस
मवायित्वपावाच्यत्ववद्भेदोघटादौपक्षधरमिश्रैःस्वीकृतः।तथाचमादृशप्रतियोगितावच्छे
दकावच्छिन्नीयत्वेनसाध्यतावच्छेदकसंबंधेनयादृशप्रतियोगिताश्रयाधिकरणान्यत्वेहे
तुमतस्तादृशप्रतियोगितासमानाधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताकतादृशाभावे
प्रतियोगितावच्छेदकत्वाभाववत्त्वंतादृशप्रतियोगितावच्छेदकान्यत्वंवासाध्यतावच्छेदकेविव
क्षितं॥तथाचघटादिनिष्ठस्यवह्नित्वेनघटाद्यभावप्रतियोगित्वस्यापितादृशत्वेनवह्नित्वादेस्त
दवच्छेदकत्वादव्याप्तिरतःसामानाधिकरण्येनेत्युक्तं।तथाचवह्नित्वस्यतादृशप्रतियोगिताव
च्छेदकत्वेपितादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्मेणतादृशप्रति
योगितावच्छेदकत्वाभावस्यतत्रसत्त्वान्नाव्याप्तिः।कालोघटवान्महाकालत्वादित्यादौतुघ

टाद्येस्वमान्याभावप्रतियोगितायाः अतथात्वेपि घटत्वेन पटाद्यभावप्रतियोगितामादायैवल
क्षणसंगतिः कालः पटत्वेन पटवान् न तु घटत्वेन इत्यनुभवात्। वन्हित्वादिसामान्यधर्मेण महान
सीयवन्ह्याद्यभावसत्वे तु यादृशप्रतियोगितावच्छेदकेत्यत्रावच्छेदकत्वं अनतिरिक्तवृत्तित्वरूपं ग्राह्यं।
तच्च तदतिरिक्तावृत्तित्वे सति तत्समानाधिकरणत्वं यद्यत्र इदन्यत्वेनातो व्यधिकरणधर्मावच्छिन्नप्र
तियोगितायाः तदुक्त एव वारणासंभवे सामानाधिकरण्यदलवैयर्थ्यमित्यस्मद्गुरुचरणाः॥ यत्तु
यत्प्रतियोगितावच्छेदकविशिष्टस्ययोगिश्रयस्याद्वद्वयोः साध्यतावच्छेदकसंबंधेनानधिकरणे
हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितात्वार्थः। तथा च वन्हित्वेन घटाद्यभावस्य घटनिष्ठ
प्रतियोगितायाअपि तादृशत्वाद्वन्हित्वादेस्तदवच्छेदकत्वमादायाः व्याप्तिरतस्सामानाधिक
रण्यपनेति प्रागुक्तार्थकं॥ तन्मते सामान्यरूपेण विशेषाभावस्यानभ्युपगमः नातो वन्हित्वे ४५

नतद्भाववमादाया व्याप्तिः। नच स्वरूपसंबंधात्मकप्रतियोगितायाः प्रतियोगिभेदेनभि
न्नत्वाद्वन्हिमान् धूमादित्यत्राव्याप्तिः वन्हिसामान्याभावीयं यन्महानसीयवन्हिनिष्ठप्रति
योगित्वं तदवच्छेदकीभूतवन्हित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयवन्हेश्चद्व
योरनधिकरणत्वस्य हेतुमति पर्वते सत्वादिति वाच्यं। प्रतियोगिव्यक्तीनां भेदेपि एकधर्माव
च्छिन्नप्रतियोगितायाः लाघवेनैक्यस्वीकारादिति। न च कालो घटवान् महाकालत्वादित्या
दौ तादृशप्रतियोगित्वाप्रसिद्ध्या व्याप्तिः गगनाभावीयप्रतियोगित्वाश्रयीभूतगगन
स्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगितायाः लक्षणाघटकत्वादिति वाच्यं। महाकाली
न्यत्वविशिष्टघटाद्यभावस्य तादृशविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरेव तथा
त्वादिति तन्न॥ प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगितायाः यद्यभेद
स्तदा वन्हित्वेन घटाद्यभावस्यापि वन्हित्वावच्छिन्नाघटानिष्ठप्रतियोगितासैव वन्हित्वेनः

वन्हिधूमोभयाभावस्यापि वन्हित्वावच्छिन्नधूमादिनिष्ठापि प्रातियोगिताऽघवात।
तथाच सामानाधिकरण्यपनेत्यस्य वैय्यर्थ्यं दुर्वारं। वन्हित्वेन घटाभावीयं यत्कूट निष्ठं प्रतियो
गित्वं हेतुतदवच्छेदकीभूतवन्हित्वविशिष्टस्यतादृशप्रतियोगिताश्रयीभूतवन्हिधूमादेश्चद्व
योरधिकरणत्वस्य सर्वत्रैव हेतुमति सत्वेन वन्हित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगि
तायाः लक्षणाघटकत्वादिति दिक्॥ एवंचेति। तथा चाव्यभिचारस्यपारिभाषिकत्वानाद
रेपि न क्षतिरिति भावः॥ वन्हित्वाद्यवच्छिन्नघटाभाववति धूमादेर्वर्तमानत्वादित्योक्तेः॥ सा
ध्याभाववेति॥ अत्र साध्याभावो व्याप्यवृत्तिर्बोध्यः॥ एवं परत्रापि। विशिष्टेति। महानसीय
त्वविशिष्टवन्हित्वाद्यवच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः॥ ननु विशिष्टस्यातिरिक्तत्वा
न्महानसीयत्ववन्हित्वयोः वैशिष्ट्यस्यैव वा परंपरया तत्राऽवच्छेदकत्वात् तन्नैष दोषइत्यत
आह हृदत्व वन्हित्वेति। ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगी सत्वादित्यत्रातिव्या

प्तिः। स्वसमानाधिकरणाभावाप्रतियोगित्वरूपस्यावच्छिन्नवृत्तिकान्यत्वरूपस्य वा व्याप्य
वृत्तित्वस्य संयोगाभावे असत्वादित्यत आह सत्ववतीति। तथा च हेतुसमानाधिकरणस्य
व्याप्यवृत्ते रित्यर्थे तेन निरवच्छिन्नहेत्वधिकरणकत्व हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनि
ष्ठाभावाप्रतियोगित्वं वा अभावस्य विवक्षितमिति भावः॥ गुरुधर्मेण साध्यतायां व्यभि
चारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्य अ उवश्य कत्वे व्याप्यवृत्ति
त्वस्य प्रकृत निरुक्तावं प्रवेशे न क्षतिरित्याशयेनाह वक्ष्यमाणं वेति। यथाश्रुतस्य प्रतियो
गितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः। तादृशप्र
तियोगितावच्छेदकीभूतद्रव्यान्यत्वविशिष्टसत्तात्वानतिरिक्तवृत्तित्वात्सत्तात्वस्येत्य
तो वक्ष्यमाणमिति॥ [illegible]द्धांतलक्षणे वक्ष्यमाणमित्यर्थः॥ तथा च हेतुमन्निष्ठाभावी
यपत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येतावच्छेदकं यद्धर्मविशिष्ट

संबंधिनिष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितायास्समानाधिकरण्ये नानवच्छे
दकं तद्धेयपारिभाषिकावच्छेदकेतरन्यत्वं साध्यतावच्छेदके विवक्षितमिति बोध्यं भाव ॥
ननु उत्पत्तिदशायां गुणसामान्याभावस्य संयोगवति घटादौ सत्वाद्गुणत्वस्य संयोग
त्वविशिष्टसंबंधिनिष्ठाभावीयसमवायसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वं वि
रहात् न तद्धर्मायसंयोगत्वस्य पारिभाषिकावच्छेदकत्वसंभावनापीत्यत आह गुणा
वृत्तित्वेति। गुणासमवेतत्वेत्यर्थः। घटादावुत्पत्तिदशायामपि गुणासमवेतस्य द्रव्य
त्वादेः सत्वान्नतदभाव इति भावः। संयोगे गुणान्यत्वसत्वेपि सत्वादित्यादौ गुणावृत्ति
त्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं संभवति गुणावृत्तित्वावच्छिन्ना
भावस्य हेतुसमानाधिकरणत्वाद् तत्संयोगसाध्यकव्यभिचारिमात्र परधर्ममादाय
संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममा॥ द्रव्यमात्रेति। द्रव्यान्यासमवेतत्वेत्य ४९

र्थः। उक्ताभावानामव्याप्यवृत्तित्वसंयोगात्मकस्य प्रतियोग्यधिकरणवृत्तित्वेन कदा
चिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्र
तियोगितानवच्छेदकत्वं तस्यात् तद्वेवनास्तितेषां व्याप्यवृत्तितया संयोगात्मकस्व प्रति
योग्यधिकरण्यावृत्तित्वादेतावन्मात्रसूचनाय व्याप्यवृत्तित्युक्तं॥ ॥ प्रश्नैगल्भलक्षणं
दूषयितुमुपन्यस्यति॥ साध्यतावच्छेदकेति॥ स्वपदं विशिष्टहेतुपरं। तथा च यद्धर्मविछि
न्नसमानाधिकरणसाध्याभाववत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधि
करण्यं तद्धर्मवत्वपर्यवसितं। अवच्छेदकत्वं चेह अनातिरिक्तवृत्तित्वे॥ व्यभिचारिणितु स
मानाधिकरणसाध्याभावस्यैव साध्यसामाना

४९

[OrderDescription]
,CREATED=22.07.19 10:53
,TRANSFERRED=2019/07/22 at 11:06:43
,PAGES=51
,TYPE=STD
,NAME=S0001059
,Book Name=M-1963-JAGDISHI NYADHIKARAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,